ff 5912

Introduction # 1, 2

Double # Page 184, 187

Missing # 194, 197, 266

Total F. 292 - 1

291

Complete

जनार्दनग्रंथः

1 मंत्रमहोदधि सूची पत्र १ पत्र-प. २७ प

सं. मूलसंख्यादिकायन कुशकाण्डिका चैतका

१ गणपति मंत्र कथनं-द्वितीयस्तरंगः २८ प. से-३१ प.

२ कालीमंत्र कथनं नाम तृतीयस्तरंगः तक

३ ३८ प. से. ४४ प. तकु ४४

४ तारामंत्रका-चतुर्थ तरंगः
४४ से लेके ५८ पत्रे तक

५ ताराभेद कथनं. पंचम स्तरंगः
५८ पत्र से ६५ पत्र तक

६ छिन्नमस्ता मंत्र कथनं. षष्ठ स्तरंगः
६५ पत्र से ७२ पत्र तक

७ वटयक्षिणी त्यादि मंत्र कथनं. सप्तम स्तरंगः
७२ पत्र से ८१ पत्र तक

८ बालात्रिपुरा मंत्र का. अष्टमस्तरंगः
८१ पत्र से. ८४ पत्र तक

९ अन्नपूर्णा मंत्र कथनं नवमस्तरंगः
८४ पत्र से. १०२ पत्र तक

९ प्रत्यंगिरा मंत्र कथनं नाम दशमस्तरंगः (नव)
१०२ पत्र से. १०५ पत्रे तक

१० बगलामुखी मंत्र कथनं. दशम स्तरंगः
१०५ पत्र से. ११६ पत्रे तक

२३ पूजार्चनं नाम त्रयोविंशतितरङ्गः
२६५ पत्रे से० २७३ पत्रे तक
२४ मन्त्रशोधनं नाम चतुर्विंशस्तरङ्गः
२७३ से० २८२ पत्रे तक
२५ षट्कर्मादिकथनं नाम पंचविंशस्तरङ्गः
२८२ पत्रे से० २९३ पत्रे तक

सूचीपत्रमिदं जनार्दनेन मदेन
नमः पं केदारनाथेन लिखितं
सं० १९८८ पं० आ० प्र० २५




H. E. PRINCE RAM SINGH,
JUMBOO.

मंम॰ १ ॐ श्रीगणेशाय नमः ॥ श्रीदक्षिणामूर्तिगुरुभ्यो न
मः करैर्दधानः परशुं कुरंगं वराख्यमुद्रामुपदेशमुद्रा
म् वटस्य मूले विविधोपमेयः सदाशिवायास्तु सदाशि
वो नः नत्वा श्रीदक्षिणामूर्तिचरणांभोरुहद्वयम् का
शीनाथः प्रकुरुते टीकां मंत्रमहोदधेः २ अथेश्वरः सर्वाश्च
पि श्रुतीर्भवपाशबद्धानां जंतूनां स्वर्गाय मुक्तये च समु
पदिशति स्म अन्येषां स्मृतिशास्त्रादीनां तन्मूलकत्वेन
च प्रामाण्यमपि च प्रसिद्धतरम् जस्मात्स्वाभासस्मृतेः ।
कथं तन्मूलकत्वमिति चेदुच्यते सर्वासु श्रुतिषु काण्ड
त्रयं कर्मोपासनब्रह्मभेदेन तत्र कर्मकाण्डं जैमिनि प्रभृ
तिभिः सम्यक्तया विहृतं श्रद्धं उपासनाकाण्डं हयग्रीवा
दिभिः ब्रह्मकाण्डं भगवद्व्यासादिभिरिति श्रुतिमूल
कतास्य प्रत्यक्षोपलब्धा श्रुतिमूलकता च त्रिपुरापूर्वोत्त
रतापनीयगोपालपूर्वोत्तरतापनीयरामपूर्वोत्तरतापनि
यनृसिंहपूर्वोत्तरतापनीयशिवपूर्वोत्तरतापनीयगणे
शपूर्वोत्तरतापनीयश्रीदक्षिणामूर्त्युपनिषदादिभ्यो ब्राह्म
णगतत्मिकश्रुतिभ्यः अनुस्यूता उपलभ्यत एव तत्र कर्म
काण्डे सर्वोप्यधिकारो मनुष्यतोरपि तत्त्वज्ञानपर्यन्तं स्वचित्त
शुद्ध्यर्थं प्रत्यवा[illegible]यपरिहारार्थं च कर्मकरणेऽधिकारसंभवा
त्तदुपासनाकाण्डेपि यतः साकारोपासनातः स्वर्गादिव
त्फलं भवति क्रमतो मुक्तिश्च कर्मकाण्डात्तु स्वर्गादिफलं वक्ष्ये ।

नरव्याघ्रायासेनभवतिःब्रह्मकाण्डात्मकत्वात्क्रियापिश्राद्दानेनैव
नर्थ्यदीर्घकालाभ्याससाध्याःअनेकजन्मसंसिद्धस्ततोयाा
तिपरांगतिमितिवचनात् उपासकानामेवागमशास्त्रात्मक
क्रियागरीयसीतिसिद्धं तथाचश्रीमच्छंकराचार्यश्रीपादाः
कृतेश्रुत्युक्तमार्गःस्यात्त्रेतायांस्मृतिसंभवः द्वापरेतुपुरा
णोक्तःकलावागमसंभवः यामले नवेदःप्रणवंत्यक्त्वाम
न्त्रोवेदसमुत्थितः तस्माद्वेदपरोमंत्रोवेदांगश्चागमःस्मृतः
अथागमशब्दव्युत्पत्तिरुक्ताश्रीरुद्रयामले आगतंशिववक्त्रा
त्तुगतंचगिरिजामुखे मतंचवासुदेवेनतस्मादागमउच्यते
अथागमशास्त्रप्रशंसा यामले ईश्वरउवाच साधुसाधु
महादेवियत्पृष्टोहंत्वयानघे तत्सर्वंचप्रवक्ष्यामिशृणुष्वै
काग्रमानसा इदंरहस्यंपरममनाख्येयंसुगोपितं नकस्या
पिमयाख्यातंप्राणवद्रक्षितंप्रिये इदानींतवभक्त्याचक
थयामिसविस्तरम् संसारसारंसर्वस्वमितिहासंपुरातन
म् इतिहासात्परंप्रोक्तंपुराणानिचपार्वति पुराणात्पर
तश्चैवश्रुतिस्मृत्यर्थउच्यते स्मृतेःपरतरंभद्रेनिर्बंधनि
र्णयात्मकम् ततःसूक्तंशिवाचेतितापिनीतत्परोदि
ते तापिन्याअधिकंज्ञेयंनिगमादिविवेचनकम् निगमा
दधिकंसत्यमागमंवाप्यतेकथ्यतेमादि अत्रचिकीर्षित
स्यग्रंथस्यनिर्विघ्नपरिसमाप्तिकामःशिष्टशिरोमणिः
श्रीमन्महीधराचार्यःपरब्रह्मानुसंधानपूर्वकमिष्टदे

न०१

मं.म. वत्तानमस्कारद्रूपंमंगलमाचरति प्रणम्येति लक्ष्म्या
२ युतोनृहरिर्लक्ष्मीनृहरिःमध्यमपदलोपीसमासः।
2 अनेकार्थध्वननमंजर्याहरिरिंद्रोहरिर्भानुर्हरिर्विष्णु
र्हरिर्मरुत् हरिःसिंहोहरिर्भेकोहरिर्वाजीहरिःकपिरि
तिःमहागणपतिमिति·महान्तस्तेसमचित्ताःप्रज्ञां
तास्त्वहदःसाधवोयेश्च कलत्वणमहान्तःगणपति

श्रीगणेशायनमः ॐशिवायनमः॥
प्रणम्यलक्ष्मीनृहरिंमहागणपतिंगुरुम
तंत्राण्यनेकान्यालोक्यवक्ष्येमंत्रमहोदधिं
॥१॥

तेनन्वातितेगणाःसांख्यनामकवेदांतविचारपराःम
हान्तश्चतेगणाश्चतेषांप्रामादिमतांवेदान्तनिष्ठानांपा
तिःपालकःगुरुंनृसिंहाश्रमं·गणातातिगुरुःशिष्येभ्य
स्तत्वज्ञानमुपदिशतीतितंत्राणितिःचतुःषष्टितंत्राणि।
अनेकार्थध्वननमंजर्यां·तंत्रंप्रधानंकुलंतंत्रंतंत्रंसिद्धोष
धंस्मृतं·तंत्रंपरिच्छदंबलंतंत्रंतंत्रेवचनसाधनमितिमंत्राण्यव
मंहतिउदकानियस्मिंतेऽस्मिन्निितिमंत्रमहोदधिग्रन्थः १

ततः प्रातरारभ्य मंत्रिणः कृत्यमाह ॥ प्रातरिति यामले:
प्रातः शिरसि शुक्लेऽब्जे द्विनेत्रं द्विभुजं गुरुं । वराभयकरं
शांतं संस्मरेत्नामपूर्वकमिति: गुरुलक्षणमाह: श्रोत्रियो
ब्रह्मनिष्ठस्तत्वप्रतिपादनसमर्थः समस्तमंत्रप्रयोगकु-
शलउपशांतशीलश्चाश्रमी परमकारुणिकः सर्वलक्ष-
णसंपन्नो मानुषः पुरुषः सर्वविद्योपदेष्टा भवति शिष्यस्तु
श्रुताध्ययनसंपन्नः सदाचारो नित्यानित्यवस्तुविवेकी स

प्रातरस्याघशिरसि ध्यात्वा गुरुपदांबुजम्
आवश्यकं विनिर्वर्त्य स्नातुं यायात्सरित्तटे
२

र्वलक्षणयुक्तो निखिलपुरुषार्थकांक्षी मंत्रदेवतोपा-
सनादक्षउपदेशार्हो भवति तत्र शिष्यः स्वगुरुं ईश्वरत्वेभा-
वयेत् नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्ति-
कं परब्रह्मस्वानुग्रहार्थं ईशं मनुष्यवेषधारयित्वाति-
ष्ठतीति स्पष्टं गुरुपादांबुजगलितामृतधारया मान-
संपानं कुर्यादित्यादि पूजानंतरं गेवक्ष्यति: चरणं पवि-
त्रमिति स्मृते ॥ २ ॥ १३ ।

मं.स. १ आवश्यकमिति: शौचादिकं धर्मशास्त्रोक्तविधिना यथोक्तं
3 विधाय स्नानार्थं सरित्तटे यायादिति: श्रौतेनेति: तत्रैव दि।
कर्मांत्रिकस्नानसंध्यां च कृत्वेष्टदेवं विचिंतयन् गृहद्वारं
आगम्य द्वारपूजां समाचरेदिति: द्वार पूजा यथा: अस्त्रां
वुना अस्त्राय फट् इत्यभिमंत्रितजलेन द्वारं प्रोक्ष्य ऊर्द्ध्वशाखा
यां ॐ गणेशाय नमः दक्षिणभागे महालक्ष्म्यै नमः वामभा

श्रौतेन विधिना स्नात्वा मंत्रस्नानं समाचरेत्
स्मार्तं संध्यां मंत्रसंध्यां कृत्वा देवं विचिंतये
त् गृहद्वारमथागत्य द्वारपूजां समाचरेत् ।
द्वारमस्त्राम्बुना प्रोक्ष्य गणेशं चोर्द्ध्वतो यजेत् ४
महालक्ष्मीं दक्षभागे वामभागे सरस्वतीं पुन
र्दक्षे यजेद्विघ्नं गंगां च यमुनामपि ५ पुनर्वामे
क्षेत्रपालेशः सिंधुयमुने अपि पुनर्दक्षे धा
तारं विधातारं च वामतः ६ तद्वन्निधी शंखप
द्मौ ततो द्वे द्वारपालकान् द्वारपूजां विधायेत्थं
प्रविश्यार्चनमंदिरम् ७ ॥

गे सरस्वत्यै नमः पुनर्दक्षिणभागे विघ्नाय: गंगायै: यमुनायै·
पुनर्वामभागे: क्षेत्रपालाय: गंगायै पुनर्दक्षिणभागे: धात्रे
वामभागे· विधात्रे· शंखपद्मनिधीत द्वत् दक्षे वामयोरिति·
दक्षिणभागे शंखनिधये: वामे पद्मनिधये· इति सामान्यद्वार
पूजा· ततो द्वे द्वारपालकानिति: द्वारपालान् ततदेवान्वसमाणान् ७

इत्थंद्वारपूजां विधायश्रर्चनमंदिरं प्रविश्यतत्रासनेस्थाप्य
वक्ष्यमाणेनासनविधिनाश्रासनेउपविश्य ॐगणेशाय
नमः गुरुभ्योनमः परमगुरुभ्योनमः परापरगुरुभ्योनमः
इष्टदेवताभ्यः इतिनत्वा पूजान्तरंगे । कृतांजलिर्वामदक्षे
गुरुंगणपतिंनमेदिति । प्राणेनायम्यतारेणेति । प्राणस्य
वायोरायामोरोधः प्राणायामः सचपूरककुंभकरेचकभे
देनत्रिविधः उक्तंचनासयाकृष्यद्वायोरोधः पूरकः उच्यते ।
कुंभोऽतिनिश्चलनिश्वासोरेच्यमानस्तुरेचकः कोंदेवतांध्या

उपविश्यासनेनत्वागणेशान्गुरुदेवताः प्राणा।
नायम्यतारेणपूरकुंभकरेचकैः ८ द्वात्रिंशा।
ताचतुःषष्ट्याक्रमात्षोडशसंख्यया देवार्चा
योग्यतावाप्यैभूतशुद्धिंसमाचरेत् ९॥

येतदाहः नीलोत्पलदलश्यामंनाभिमध्येप्रतिष्ठितम् चा।
तुर्भुजंमहात्मानंपूरकेचिंतयेद्धरिम् कुंभकेहृदिसंस्था
नंध्यायेच्चकमलासनम् ब्रह्माणंरक्तगौरांगंचतुर्वक्त्रंपि
तामहं रेचकेचेश्वरंध्यायेचलाटस्थंमहेश्वरम् शुद्धस्फ
टिकसंकाशंनिर्मलंपापनाशनमिति द्वात्रिंशद्वारंप्रण
वंजपन्प्राणंपूरयेत् चतुःषष्टिवारंजपन्कुंभयेत् षोड
शवारंजपन्रेचयेदित्यर्थः इतिप्राणायामः ९

तं०१

मं.म.
४
५

अथभूतशुद्धिः भूतशुद्ध्यादौ ॐस्वस्तिश्रीपरमशिवनाथश्रीपादा
द्यशेषगुरुपारंपर्यक्रमेणगुरुनाथपादांबुजंयावत्तावत्प्रणौ।
मि· अथवा· वस्त्राद्यशेषगुरुपादपर्यंक्रमेणस्वगुरुनाथपादां।
बुजंयावत्तावत्प्रणौमि· श्रीदेवार्चायोग्यताप्राप्तयेभूतशुद्धिंका।
रिष्येइतिसंकल्प्यमूलाधारस्थितांदेवीमितिध्यात्वा· मूलाधा
रात्कुण्डलिनीमुत्थाप्यहंसइति· मंत्रेणहृदयाद्दीपकलि

मूलाधारस्थितांदेवीकुण्डलीपरदेवताम् विस
तन्तुनिभांविद्युत्प्रभांध्यायेत्समाहितः १ मूला
धारात्समुत्थाप्यसंगतांहृदयांबुजे सुषुम्णामा
र्गमाश्रित्यदाद्यजीवंहृदंबुजात् ११ प्रदीपकलि
काकारंब्रह्मरंध्रगतांस्मरेत् जीवंब्रह्मणिसंयो।
ज्यहंसमंत्रेणसाधकः १२ पादादिब्रह्मरंध्रान्तं
स्थितंभूतगणंस्मरेत् स्ववर्णवीजाकृतिभिर्यु
क्तंतद्विधिरुच्यते १३॥

काकारंजीवंगृहीत्वासुषुम्णामार्गेणब्रह्मरंध्रंगत्वाब्रह्मणि।
स्थापयेदिति गुरूपदेशगम्योर्थोयोगिनोज्ञेयोयोगाभावेभा।
वनाविधेयाः १२ स्ववर्णवीजाकृतिभिरितिः वर्णाः पीताद
यः पीतः श्वेत· रक्त· धूम्र· स्वच्छ· वीजानिलमित्यादीनि· लं
वंरंयंहं· आकृतिश्चतुष्कोणादयः तद्युक्तंभूतगणम् १३॥

तदेव दर्शयति· पादादिजान्वपर्यंतमित्यादि वज्राकारः त्रि
षष्ट्यंकः परस्परसंभिन्नः त्रिकोणमिति· ऊर्ध्वाग्रं त्रिकोणं वह्निः
ऊर्ध्वं वह्नेरूर्ध्वः शक्रात्मकत्वात्· स्वस्तिकं तामपरस्परसंबद्धं विदिग
तचतुर्वक्त्रं रेखायुगलं· अथ भूमण्डले पादेन्द्रियं गमनं घ्राणं ।

पादादिजान्वपर्यन्तं चतुष्कोणं सवज्रकम्
भूवीजाढ्यं स्वर्णवर्णं स्मरेदवनिमण्डलम् ४
जान्वाद्यानाभिचंद्रार्द्धनिभं पद्मद्वयांकितं ॥
वंवीजयुक्तं श्वेताभमंभसो मण्डलं स्मरेत् १५ ।
नाभेर्हृदयपर्यंतं त्रिकोणं स्वस्तिकान्वितम्
रंवीजेन युतं रक्तं स्मरेत्पावकमण्डलम् १६
हृदो भ्रूमध्यपर्यन्तं वृत्तं षड्बिंदुलांछितम् यं
वीजयुक्तं धूम्राभं नभस्वन्मण्डलं स्मरेत् १७ ।
आब्रह्मरंध्रं भ्रूमध्याद्वृत्तं स्वच्छं मनोहरम् हंवी
जयुक्तमाकाशमण्डलं प्रविचिंतयेत् १८ ॥

गंधो ब्रह्मनिवृत्तिसमानः गंतव्यो देशोपि· एवमष्टोपदा
र्थाश्चिंत्याः एवं जलमण्डले हस्तग्रहणयोरावस्सनारसव
तस्तुप्रतिष्ठोदानाः ॥११

तं॰१

मं.म॰ तेजस्तिद्यायुविसर्गविसर्जनायचक्षुरूपविवाविद्याख्यानाःपा।
५ यौऽपस्थानंदस्त्रौस्पर्शनस्पर्शेशानशांत्यपानाःनभस्तिवाग्वक्त्रं।

यद्ब्रह्मणारूपस्याद्यावाकक्रमाद्धेयाधरादिगाः
स्वकीयविषयैस्सत्कारागमनग्रहणादिभिः १९।
घ्राणंचरसनाचक्षुःस्पर्शनंश्रोत्रमिंद्रियम् क्र।
माद्धेयंधरादिस्थंगंधादिगुणसंयुतम् २०ब्रह्म
विष्णुशिवेशानाःसदाशिवइतीरिताः भुवादि
भूतसंधेयाध्येयास्तन्मात्राण्डलेषुते २१ निवृत्ति
श्चप्रतिष्ठापिविद्याशांतिश्चतर्यिका शांतातीं।
तेतिपंचैताःकलाध्येयाधरादिगाः २२ समानो
दानव्यानाश्चापानप्राणौचवायवः धरादिम।
ण्डलगताःपंचध्येयाःक्रमादिमे २३॥ः

व्यवदनश्रोत्रशाहृसदाशिवशांत्यतीताःप्राणाः २४॥ राम
॥
॥
॥

एवंदेहेपंचभूतानिध्यात्वाःस्वस्वकारणेविलापयेत्·भुवं
जलेप्रविलापयामि·जलंवह्नौप्रविलापयामि·वह्निंवायौप्र
विलापयामि·वायुमाकाशेप्रविलापयामि·आकाशमहंका
रेप्रविलापयामि·अहंकारंमहत्तत्वेप्र·तन्महत्तत्वंमूलप्रकृ।
तिरूपमायायांप्र·तांमायांसच्चिदानंदलक्षणेपरेब्रह्मणि।
शिवेप्र·महत्तत्वमितिःस्फटिकतैवसर्वशक्तिमानीश्वरःमह

एवंभूतानिसंचिंत्यप्रत्यमेकंविलापयेत् भुवंज
लेजलंवह्नौवह्निंवायौनभस्यमुं २४ विलाप्यत्वम
हंकारेमहत्तत्वेप्यहंकृतिं महांतंप्रकृतौमायामा
त्मनिप्रविलापयेत् २५ शुद्धःसच्चिन्मयोभूत्वा।
चिंतयेत्पापपूरुषं दक्षकुक्षिस्थितंकृष्णमंगुष्ठ।
परिमाणकं २६ विप्रहत्याशिरोयुक्तंकनकस्ते।
यवाहुकं मदिरापानहृदयंगुरुतल्पकटीयुतं २७
पापिसंयोगिपद्द्वंद्वमुपपातकरोमकं खड्गचर्म
धरंकृष्णमधोवक्त्रंसुदुःसहं २८ वायुबीजंस्मरन्वा
युंसंपूर्ण्यैनंविशोषयेत् स्वशरीरयुतंमंत्रीवह्निबीजे
ननिर्दहेत् २९ कुंभकेपरिजप्तेनततःपापनरोद्भ
वे वह्निर्भस्मसमुत्सार्यवायुबीजेनरेचयेत् ३० सुधा
बीजेनदेहोत्थंभस्मसंप्लावयेत्सुधी ।
तीमनोवृत्तिर्महदितिश्रुतिः एवंविलाप्यपरब्रह्मैवशिवोमह
स्मीतिचिरंध्यायेत् शुद्धःसच्चिन्मयोभूत्वेत्यादि·दक्षकुक्षिस्थि
तंपापपुरुषमित्येतस्यव्यवस्था·हृत्कलत्रराजे·प्रोवेदत्तक्रमेणैव
प्राक्तोवामक्रमेणचः·पुनस्तत्रैवः·विद्यामात्रेवामकृतोभूतशुद्धिः

मं.म.
६
6

प्रकीर्त्तिताः दक्षकुक्षौमहेशशाशानिकुत्रचित्परिकीर्त्तिता ह
ति· वायुवीजं रं सुधावीजं वं भूवीजं लं नभोवीजं हम् ११ ततो
यमितिवायुवीजेन द्वात्रिंशद्वारमाहूतेन वामनासया वायुमा
पूर्य रमितिवीजेन चतुःषष्टिवारमावर्त्तितेन कुंभकं कृत्वा पुनर्य
मितिवीजेन षोडशवारमावर्त्तितेन पापभस्म दक्षिणनासया·
रेचयेत्· ततो वमित्यमृतवीजेन देहोत्थं भस्म संप्लाव्य· लमिति
वीजेनैकीकृतं तत्सुवर्णाभावयित्वा हमितिवीजेन सर्वांगात्सु·
हृत्पंकनूतनमयं शरीरं ध्यात्वा· आकाशादीनि भूतानि पुनस्पाद
येत्ततः चितो ब्रह्मणः सकाशात्· पुनरात्मनः सकाशादाकाशः संभू
भूवीजेन घनीकृत्य भस्म तत्कनककाण्डवत् १९ वि
शुद्धकुण्डकारं जपन्वीजं विहाय सः मृद्धादिपा
हृत्पर्यन्तान्स्वतानि वचयेत्सुधीः १२ आकाशादी·
नि भूतानि पुनस्स्मादयेद्वितः सोहं मंत्रेण चात्माम्
मानयेहृदयांबुजे १३ कुण्डलीं जीवमादाय परम
गात्सुधामयम् संस्थाप्य हृदयांभोजे मूलाधारगा
तां स्मरेत् १४ भूतशुद्धिं विधायैवं प्राणस्थापनमा
चरेत् प्राणप्रतिष्ठामंत्रस्य पुनर्वीजे शपसज्ञाः १५
मेत्रयाशक्तिरंकुसं कीलकं स्मरेत् १६ इत्यं भूतं स
धीः कुर्यादिति नियोगोः स्तमंस्थितो ऋषीन शिरसि
वक्त्रे नछंदांसि हृदि देवता १७ ॥:
तः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी भूतान्युत्पादय
स्थानगंगानि ध्यात्वा सोहमिति मंत्रेण कुण्डलिनीसहितं जीवं सुधा·
नीय स्वधामयं जीवं हृदि नियोज्य कुण्डलिनीं मूलाधारगतां ध्यायेदि·
निभूतशुद्धिः १८ अथ प्राणप्रतिष्ठामाह· अस्य श्री प्राणप्रतिष्ठामंत्र
स्या जेशपस्रजा ऋषयः ऋग्यजुःसामानि छंदांसि प्राणशक्तिर्देवता·
आमिति पाशवीजं क्रोमंकुशवीजं ह्रीं शक्तिः अस्य सं
स्थितो प्राणस्थापने विनियोग ब्रह्मविष्णुरुद्रेभ्यो नमः शिरसि ॥

ऋष्यङ्गः सामभयश्छंदोभ्यो नमो मुखे· प्राणशक्तिदेवतायै नमो हृ
दये· श्रांबीजाय नमो गुह्ये· ह्रीं शक्तये नमः पादयोः इति ऋष्यादिः ३७
षडंगमाह कवर्गेति तत्र क्रमः पंचममिति प्रयोगः ङ· कं खं गं घं आकाशवा
युतेजोजलपृथिव्यात्मने हृदयाय नमः ञं चं छं जं झं शब्दस्पर्शरूपरसगं
धात्मने शिरसे स्वाहा। णं टं ठं डं ढं श्रोत्रत्वक्नयनजिह्वाघ्राणात्मने शि
खायै वषट् नं तं थं दं धं वाक्पाणिपादपायूपस्थात्मने कवचाय हुं· मं पं।

गुह्ये बीजं पदोः शक्तिं सर्वांगे कीलकं भजेत् कृत्वा ऋष्या
दिकं न्यासं ततः कुर्यात्षडंगकं ३८ कवर्गेन भजाङ्गे।
स्वं शब्दाद्यैः शिरः स्मृतं टश्रोत्राद्यैः शिखा प्रोक्ता तु वा
गाद्यैस्तु कवचं ३९ पवर्गव्यादिभिर्नेत्रमस्त्रं येनांतरि
न्द्रियैः आत्मने तात्मनन्तां नान्विन्यसेद्धृदयादिषु ४०
पंचमं प्रथमं पश्चाद्द्वितीयं च चतुर्थकं तृतीयमित्थं क्र
मतो वर्गवर्णान्समुच्चरेत् ४१ यवर्गे ध्येव मन्त्रार्थ्यं नभः
श्वेतोऽतिमो भृगुः विमलश्चेति वोचार्थ्यं क्रमाद्धूर्णाः
सविंदवः ४२ नभो वाय्वग्निवार्भूमिनभश्चादयईरिताः
शब्दस्पर्शरूपरसगंधाः शब्दोदयामताः ४३ श्रोत्रं त्व
क् चक्षुर्जिह्वाघ्राणं श्रोत्रादयः स्मृताः वाक्पाणि
पादपायूपस्थावागादयः प्रतः ४४ वक्तव्यादानग
मनविसर्गानंदसंज्ञिताः वक्तव्याद्या बुद्धिमनोऽहंका
राश्चितसंयुताः ४५ अंतरिन्द्रियसंज्ञाः स्युरेवमस्त्रं षडं
गकं नाभेरारभ्य पादांतं पाशबीजं प्रविन्यसेत् ४६॥

फं भं वं· वक्तव्यादानगमनविसर्गानन्दात्मने नेत्रत्रयाय वौषट् यं
रं वं लं हं षं क्षं सं लं बुद्धिमनोऽहंकारचिदात्मने अस्त्राय फट्· नभो
हकारः श्वेतः षकारः अतिमः क्षकारः भृगुः सकारः विमलो लकारः
नाभ्यादिपादांतं आमिति पाशबीजं न्यसेत्· हृदयादि नाभ्यंतं ह्रीं
मिति शक्तिबीजं मस्तकादि हृदयांतं क्रोमिति अंकुशबीजं न्यसेत्

त.१

नेम· ८ 7

आत्मने इति· आत्मनेनम इत्यंतानि त्वगादीनि हृदि न्यसेत्·
यादिवर्णपूर्वाणि· यं त्वगात्मनेनमः रं असृगात्मनेनमः लं मांसा
त्मने· वं मेदात्मने· शं अस्थ्यात्मने· षं मज्जात्मने· सं शुक्रात्मनेनमः
इति· सद्यओकारस्तदन्वितमोकारोहकारः तदाद्यमोजस्तेनहों
ओज आत्मनेनमः एवं हकारः तदादिकं प्राणं हं प्राणात्मनेनमः
स्फुः सकारस्तदादिकं जीवं सं जीवात्मनेनम इत्यादि हृदयेम

ताभ्यस्तं हृदयाच्छक्तिं हृदं तं मस्तकाच्छक्तिमत् त्वा
गसृङ्मांसमेदोस्थिमज्जाशुक्राणि विन्यसेत् ४७
आत्मने हृदयांतानि यादिसप्तादिकान्यपि ओ
जस्सद्यान्वितं कायं पूर्वं प्राणं तु षादि सन्
स्फुरवादिकं न्यसेज्जीवमेतान् हृदयदेशतः ॥ ४८
यकाराद्याश्च वर्णाः सर्वे सश्चंद्रभूषिताः ४९
ततः समस्तमूलेन मूर्द्धादिचरणावधिः ॥
विधयव्यापकन्यासं विन्यसेत्पीठदेवताः ५०

सेत्· याद्यष्टौ वर्णाश्चंद्रेणानुस्वारेण भूषिताः युताः का
र्याः ४९ समस्तमूलेनेति· समस्तप्राणमूर्द्धादिचरणाव
धिव्यापकं कुर्यात् अथ पीठन्यासः मण्डूक इत्यादि पीठदे
वताः स्वयंसिद्धा इत्यत्र समृद्धविशेषं वक्ष्यति· विरागता वे
राग्यं नञादिका अधर्मा यत नम इत्यादि ५० ॥३॥

पीठदेवतानांन्यासस्थानानिवहिर्यागेचपूजास्थानानि· एकविंशो।
तरंगेवक्ष्यंते· ताःसाधुकाद्याः मेंहाधारशक्तिताः सान्तसांवप्रथमा
न्तरयुताःममण्डूका यनमः कांकालाग्निरुद्रायः आंआधारश
क्त्यैः कूंकूर्माय· धंधरण्यैः सुंसुधासिंधवेः श्वेंश्वेतद्वीपायः सुंसु।
रद्रुमेभ्यः मंमणिमण्डलाय· हेंहेमपीठायः धंधर्माय· ज्ञांज्ञानायः
वैंवैराग्याय· ऐंऐश्वर्याय· अंअधर्माय· अंअज्ञानायः अंअवैराग्या

मंडूकश्चाथकालाग्निरुद्रश्चाधारशक्तियुक् कूर्मोथ
धरणीसुधासिंधुःश्वेतद्वीपःसुरांघ्रियं ५१ मणिहर्म्यंहेमपी
ठंधर्मोज्ञानंविरागता। ऐश्वर्यंधर्मपूर्वास्तुचत्वारस्तेत
ज्ञादिकाः ५२ धर्मादयःस्मृताःपादाःपीठगात्राणि
चेतरे मध्येनंतंस्तत्वपद्ममानंदमयकंदकं ५३ संवि
न्नालंततःप्रोक्ताविकारमयकेसराः प्रकृत्यात्मकप
त्राणिपंचाशद्वर्णकर्णिकाः ५४ सूर्य्येंदोःपावक
स्यमण्डलत्रितयंततः सत्वंरजस्तमःपश्चादात्मा उ
तोंतरात्मना ५५ परमात्माथज्ञानात्मातत्वेमाया
कलात्मके विद्यातत्वंपरंतत्वंकथिताःपीठदेवताः ५७
पूजनेसर्वदेवानांपीठेताःपरिपूजयेत् न्यासस्थाना
निचैतासांशरीरेवहिरर्चने ५८॥

यः अंअनैश्वर्यायः मध्ये· अंअनंतायनमः पंपद्मायः आंआ
नंदमयकंदायः संसंविन्नालायः विंविकारमयके· सरेभ्यः प्रंप्र
कृत्यात्मकपत्रेभ्यः पंपंचाशद्वर्णवीजाढ्यकर्णिकायैः अंअर्क।
मण्डलाय· सोंसोममण्डलायः अंअग्निमंडलाय· संसत्वाय· रं
रजसे· तंतमसे ५९॥


मं.म.
८
8

पूजान्तरंगे तत्रात्मत्रयमाद्यार्णपूर्ववत्तूर्ध्वं परादिकमिति अस्या-
र्थः आत्मत्रयमादयः अउम इति वर्णास्तत्पूर्वं अं आत्मनेनमः।
अंतरात्मने· मं परमात्मनेन· तदूर्ध्वं ज्ञानात्मानं परादिकं· पराभु-
वनेश्वरीबीजं ह्रीं ज्ञानात्मनेनमः मां मायातत्त्वाय· कं कलातत्त्वा
यविं विद्यातत्त्वाय· पं परतत्त्वाय इति पीठदेवताः ५९ हृदयेति ता
पवाह· जयेति· ॐ· जयायैनमः विजयायै· अजितायै· अपराजि-

पूजान्तरंगे वह्न्यंते से ह्रौं घर्णाद्युताश्रिताः प्राणशक्तेस्त-
तः पूज्या अष्टौ पीठस्य शक्तयः ५९ हृदयांभोजपत्रेषु
नवमीं तु च कर्णिकां जया स्याद्विजया पश्चादजि
ता चापराजिता ६० नित्या विलासिनी दोग्ध्री त्वघो
रा मंगला तिमा पाशादिबीजत्रितयं प्रोच्य पीठं दि
शेत्ततः ६१ एवं देहमये पीठे ध्यायेद्देवीमभीप्रदां।
नवयौवनगर्वाढ्यां पीवरस्तनशोभितां ६२ पा
शांकुशौ चापशरौ कपाले शूलीं शूलं हस्तैर्बिभ्रतीं
रक्तवर्णां रक्तोदन्वत्पोतरक्तांबुजस्थां देवीं ध्यायेत्।
प्राणशक्तिं त्रिनेत्राम् ६३॥

रायैः नित्यायै विलासिन्यैः दोग्ध्र्यैः अघोरायै· मंगलायै·
इति पीठशक्तिः ६ पाशादीनि। आं ह्रीं क्रों इति पीठमंत्रेणापी-
ठं संपूज्य ध्यानमाह। नवयौवनगर्वाढ्यां पीवरस्तनशोभितां
पाशांकुशौ चापशरौ कपाले शूलीं शूलं हस्तैर्बिभ्रतीं रक्तवर्णां
रक्तोदन्वत्पोतरक्तांबुजस्थां देवीं ध्यायेत्प्राणशक्तिं त्रिनेत्राम्
मिति षड्हस्तां देवीं दिव्यतीति देवी तेजो रूपेत्यर्थः पाशश्व-
ला निवामहस्तेषु रक्तकपालांकुशबाणादक्षेषु रक्तमयोदधौ
त्वा नस्तमदस्तत्रपोतो नौकान्तरं रक्तपद्मं तत्र स्थिता ६३॥

यंत्रोद्धारमाह अष्टपत्रस्य षट्कोणे ध्यात्वेवं पूजयेन्नतां·तांप्रा
णशक्तिं पूजयेदिति आवरणदेवतामाह प्रागिति·
पूर्वकोणे·ॐब्रह्मणेनमः नैरृत्ये ॐ·विष्णवे·वायव्ये
ॐ·रुद्राय अग्निकोणे·ॐ·सरस्वत्यै·वरुणकोणे ॐ·ल
क्ष्म्यै·ईशानकोणे·ॐ·पार्वत्यैनमः इति प्रथमावरणं
केशरेषु षडङ्गानीति अष्टपत्रस्य केशरेषु·ॐ·कंखं
गंघंङं आकाशवायुतेजोजलपृथिव्यात्मने हृदयाय



नमः अग्निकोणे जंचंछंफंजंणं शब्दस्पर्शरूपरसगंधात्मने शिरसे

अष्टपत्रस्य षट्कोणे ध्यात्वेवं पूजयेत्तु ताम् प्रागुरा
दौ वायुकोणेषु ब्रह्मविष्णुशिवान् यजेत् ९४ अग्नि
वारुणयोर्वेषु वाणीलक्ष्मीहिमाद्रिजाः केसरेषु ष
डङ्गानि पत्रेष्वष्टौतु मातरः ९५ ब्राह्मी माहेश्वरी वा
पि कौमारी वैष्णवी तथा वाराही च महेन्द्राणी चा
मुण्डा सप्तमी मता ९६ ॥

स्वाहा·निरृतिकोणे णंटंठं ॐ·डं श्रोत्रत्वकचक्षुर्जिह्वाघ्राणा
त्मने शिखायै वषट् वायुकोणे तंतंथंधंदं·वाक्पाणिपादपा
यूपस्थात्मने कवचाय हुं·ईशानकोणे मंपंफंभंबं वक्तव्यादानगा
मनविसर्गानंदात्मने नेत्रत्रयाय वौषट्।मध्ये।शंषंरंवंलंहं
षंक्षं सं लं बुद्धिमनोहङ्कार चितात्मने अस्त्राय षट् दिक्षु इति द्वि
तीयावरणं·अथाष्टपत्रेषु प्रागादि प्रागदक्षिणेन·दीर्घाद्या
मातर इति ॐ·आं ब्रह्म्यैनमः·ॐ·ईं माहेश्वर्यै·ॐ·ऊं कौमार्यै·ॐ·
ऋं वैष्णव्यै·ॐ·लृं वाराह्यै·ऐं इन्द्राण्यै ॐ·औं चामुण्डायै·ॐ·अः म
हालक्ष्म्यै·इति तृतीयावरणं देवता पूजायां प्राचीमध्ये पूज्य
पूजकयोरिति इन्द्रादयः प्रसिद्धदिग्भेवाच्या·अन्यावरणे पूज्य
पूजकयोर्मध्ये प्राची ९७।

मं.म. ५ लं इंद्राय सुराधिपतये सायुधाय सवाहनाय सशक्तिकाय
प्राणशक्तिपार्षदाय नमः इति पूर्वे · एवं अग्न्यादिपदस्थाने
तत्र शक्तं चेत · लं इंद्राय नमः रं अग्नये नमः यं यमाय क्षं
निरृतये वं वरुणाय यं वायवे सं सोमाय हं ईशानाय पू
र्वेशयोर्मध्ये आं ब्रह्मणे नमः निरृतिवरुणयोर्मध्ये ह्रीं
अनंताय नमः इति चतुर्थावरणं इंद्रादीनां समीपे वं व
ज्राय नमः शं शक्त्यै · दं दण्डाय खं खड्गाय · पां पाशाय · ।

अष्टमी तु महालक्ष्मीः प्रोक्ता विश्वस्य मातरः देव
ता पूजने प्राचीमध्ये पूजकपूज्ययोः ६७ इंद्राद्य
स्त्वदिशे व पूजनीया दिगीश्वराः इंद्रः कृशानुः ।
कीनाशो निरृति वरुणो निलः ६८ सोम ईशा
ननामा यो नंत ऊर्ध्वं चतुर्मुखः तत इंद्रादिकाष्टा
स्तु पूज्या दिकपालहेतयः ६९ वज्रं शक्तिं दण्ड
खड्गौ पाशो कुशमादेअपि त्रिशूल चक्रपद्मानि
दश दिकपालहेतयः ७१ एवमिष्टा प्राणश
क्तिं पंचावरणसंयुतां ध्यायन्स्फटिकं दृष्ट्वा त्रिजे
पेन्मंत्रमंत्रमथीः ६९ वसेध्यतामनोस्त्रस्पोहार्दं ध्या
त्स्वावावहन्न पाशं मायां स्वर्गिं प्रोच्चयाद्यौत्स
में दुसंयुतात् ७० ॥:

अं अं कुशाय मं गदायै त्रिं त्रिशूलाय · चं चक्राय · पं पद्माय ·
इति पंचपावरणम् अन्यावरणं चैतत्कृत्वा · ध्यायन्स्फटिक
रं दृष्ट्वा त्रिजेपेन्मन्त्रवेत्ताथीः ६९ प्राणमंत्र समस्तहृदिति ·
पाशमिति आं ह्रीं क्रों यं रं लं वं शं षं सं ताराद्यन्वितं नमः होमि
ति · सप्तवर्णो वसुमाता · अजपा हंसः ७० ॥

सप्तार्णमुद्धरेत् ऋषिः सविंदवरूतिः मेरुः हकारः हंसः सकारः।
आकाशो हकारः भृगुः सकारः माया ह्रींकारः तारः उद्धरेत् प्राण
वायुरितिस्तेन ॐ हंसं हंसः ह्रीं ॐ इति सप्तार्णः संभूयपथा।
आं ह्रीं क्रों यं रं लं वं सं हों हंशं हंसं। ह्रीं ॐ हंसः ममप्राणा इहप्रा
णाः पुनः आमित्यादि ममजीव इहस्थितः आमित्यादि म।

तारान्वितेन भः सप्तवर्णः मंत्रं ततो जपं ममप्रा।
णा इह प्राणा ममजीव इहस्थितः ११ ममसर्वेन्द्रि
याणि पुनः ममवाङ्मनश्चक्षुःश्रोत्रं घ्रा
णपदात् प्राणा इह समीर्य च १२ आगत्य सुखं
चिरं तिष्ठन्तु इदं पदेत् वह्निजायां च स।
प्तार्णमंत्रमंते पुनर्वदेत् १३ प्राणप्रतिष्ठामंत्रोऽयं
स्मृतः प्राणनिधापने ममेत्यस्य पदस्यादौ पाशा
दीति समुद्धरे १४ यंत्रेषु प्रतिमादौ च प्राणस्थापन
माचरेत् ममस्थाने तस्य तस्य षष्ठ्यंतां नामभिर्यो वदेत्
सविंदवो मेरुः हंसाकाशः सर्गी भृगुः पुनः माये।
तितारको ह्योयं मंत्रः सप्ताक्षरो मतः १६ ॥

ममसर्वेन्द्रियाणि। आमित्यादि ममवाङ्मनश्चक्षुःश्रोत्रघ्राण
प्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा। ॐ हंसं हंसः ह्रीं ॐ। इति
प्राणप्रतिष्ठा। यंत्रेषु प्रतिमादिषु प्राणस्थापनमाचरेत्। मम
स्थाने तस्य तस्य षष्ठ्यंतां नामभिर्यो वदेदिति १६ ॥ ११
॥ ॥ ॥

नं.१

मे.म. ९ 10 प्रणवप्रतिपाद्यपरब्रह्मनामप्रपंचोदानमातृकामंत्राख्य
शब्दब्रह्माकारेणविवर्ततइतिमातृकामंत्रभजनप्रकारः स
त्तिपद्यउच्यते मातृकामाह अकाराद्याइति प्रसिद्धाइत्यर्थः
अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं
चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं
शं षं सं हं ळं क्षं ॥ अस्यश्रीहृष्टिमातृकान्यासस्यब्रह्मऋ

एवंप्राणान्प्रतिष्ठाप्यमातृकान्यासमाचरेत्।
अकाराद्याःक्षकारांतावर्णाःप्रोक्तास्तुमातृका :७७
प्रजापतिर्मुनिस्तस्यागायत्रीछंदइरितं सरस्वती
देवतोक्ताविनियोगोखिलाप्तये ७८ हलोबी
जानिचोक्तानिस्वराःशक्तयईरिताः मूर्द्धिवक्त्रे
हृदिन्यस्यऋष्यादिन्साधकोत्तमः ७९ पंचव
र्गैर्यादिभिश्चषडंगानिसमाचरेत् क्लीवहीन
शशांकाढ्यहूस्वदीर्घांतरस्थितैः ८०॥

ऋषयेनमोमूर्द्धि गायत्रीछंदसेनमोवक्त्रे· सरस्वतीदेवता
येनमोहृदि हलबीजेभ्योनमोगुह्ये स्वरशक्तिभ्योनमः
पादयोः अखिलाप्तयेविनियोगः ७७ षडंगमाह पंच
वर्गैर्यादिभिश्च क्लीवान्‌ऋॠऌॡन्हीनायेसानुस्वारायेहूस्वदी
र्घयन्त्रप्यु... षड्वर्गैः षडंगानि अंकंखंगंघंङंआंहृदयाय नमःइंचं
...४ ईंशिरः ३ उं टं ४ ऊंशिखायै ऋं तं ४ ऐंकवचं ओंपं ४ औंने
त्रत्रयं अः यं ४ अस्त्रं ८०॥

ध्यानमाह पंचाशद्वर्णैर्रचितांगभागां धृतेंदुखण्डां कुमुदावदातां
वराभये पुस्तकमक्षसूत्रं भजे गिरं संदधतीं त्रिनेत्राम् पंचाशद्वर्णा इ
ति वर्णैरंगा रचितान्यस्या इत्यर्थः वराक्षस्रजौ दक्षयोः पुस्तकाभये
वामयोः गिरं सरस्वतीं ८२ ध्यात्वैवं पूजयेत् पीठदेवताः पूर्वमीरि
ताः इति पूर्वमीरिता मण्डूकाद्याः वाह्यपूजार्थं यंत्रोद्धारमाह श्री
दक्षिणामूर्तिसंहितायां आदौ पद्मं कर्णिकायां हंसाख्यं हस

सान्तस्वरैर्ज्योतिषुक्के ध्यायेद्देवीं ततोंबुजे पंचाशद
र्णैर्रचितांगभागां धृतेंदुखण्डां कुमुदावदातां वरा
भये पुस्तकमक्षसूत्रं भजे गिरं संदधतीं त्रिनेत्राम् ८२
ध्यात्वैवं पूजयेत्पीठदेवताः पूर्वमीरिताः पीठशक्ती
स्तदुपरि सम्यक्स्थाने वा चर्चयेत् ८३ मेधा प्रज्ञा प्रभा विद्या
श्री धृति स्मृति बुद्धयः विद्येश्वरीति संप्रोक्ता मातृ
काः पीठशक्तयः ८४ ॥

सर्गवान्वाह्योऽष्टदलमालिख्य केशरेषु स्वयं न्यसेत् युग्मयुग्मप्र
भेदेन ततो वसुदलेषु च कादिवर्गाष्टकं योज्यं लक्षांतं परमेश्व
रि चतुरस्रं ततः कुर्यात् सिद्धिदं दिक्षु संलिखेत्
ठकाराणां चतुष्कं च रेखांतं वाह्यतस्ततः वारुणं
च समालिख्य देवीमावाहयेत्सुधीः आदौ पीठार्च
नं कृत्वा नवशक्तिपुरस्कृतमिति· पीठशक्तीः ॐ·



में मेधायै· प्रं प्रज्ञायै· प्रं प्रभायै· विं विद्यायै· श्रीं श्रियै· धृं धृत्यै·
स्मृं स्मृत्यै बुं बुद्ध्यै· इत्यष्टदिक्षु· ॐ· विं विद्येश्वर्यै नमो मध्ये ८४
॥ ॥ ॥

न॰१

मंम॰ ११ आसनमंत्रमाह वियत् हकारः भृगुः सकारः मनुरौकारः
तेन स्हौः मातृकायोगपीठाय नमः इति पीठमंत्रेण पीठं दत्वा ८५
मूलेनेति मातृकामंत्रेण मूर्तिं संकल्प्य तस्यां सरस्वतीं पू
जयेत् अथावरणपूजा षडंगैः प्रथमावरणं अष्टदलमूले॰
अंआंनमः इंईंनमः उंऊंनमः ऋंॠंनमः ऌंॡंनमः एंऐं
नमः ओंऔंनमः अंअः नमः । इतिद्वितीयावरणम् दल
मध्ये कं ५ नमः चं ५ नमः टं ५ नमः पं ५ यं ३ शं ४ लं क्षं न
मः इतितृतीयावरणपूजा तदग्रेषु ॐ व्यांव्यापिन्यै नमः ॥

वियद्भृगुस्थं मनुशुक्रविसर्गाढ्यं च मातृकाः
योगपीठायनत्यंतो मनुरासनदेशने ८५ मू
र्तिं संकल्प्य मूलेन तस्यां वाणीं प्रपूजयेत् आ
दावंगानि संपूज्य द्वितीये पूजयेत्स्वरो ८६ ॥

ॐ पांपालिन्यै नमः ॐ पांपाविन्यै॰ ॐ क्लेंक्लेंदिन्यै॰ ॐ धांधारि
ण्यै॰ मांमालिन्यै॰ हंहंसिन्यै॰ शंशंखिन्यै॰ । इतिचतुर्थाव
रणं अष्टदलाग्रेषु ब्राह्म्यादिभिः पंचमावरणम् इंद्रादिभिः
षष्ठावरणम् वज्रादिभिः सप्तमावरणं इत्यावरणार्चनं कृत्वा
निजांगके वर्णान्न्यसेत्॰ यथा अं नमो ललाटे आः नमः ।
मुखवृत्ते इः नमो दक्षनेत्रे॰ ईं नमो वामनेत्रे॰ उं नमो दक्षश्रो
त्रे॰ ऊं नमो वामश्रोत्रे ऋः नमो दक्षनासापुटे ॠः नमो वा
मनासापुटे ऌः नमो दक्षगण्डे ॡः नमो वामगण्डे एः नमो
र्ध्वोष्ठे ऐं नमो अधरोष्ठे ओः नमऊ ॥

ऊर्ध्वदंतपंक्तौ ओः नमः अधोदंतपंक्तौ औं नमो मूर्ध्नि अः नमो
वक्त्रे कः नमो दक्षबाहुमूले खः कूर्परे गः मणिबंधे घः दक्षां
गुलिमूले ङः दक्षांगुल्यग्रेः एवं वामहस्ते चवर्गं न्यसेत् चः
नमः छः नमः जः नमः झः नमः ञः नमः टः नमः दक्षपाद
मूले ठः नमः दक्षजानुनि डः नमः दक्षगुल्फे ढः नमः द
क्षपादांगुलिमूले णः नमः दक्षपादांगुल्यग्रे एवं वामपा
दे तवर्गं न्यसेत् तः नमः थः नमः दः नमः धः नमः नः नमः
पः नमः दक्षपार्श्वे फः नमः वामपार्श्वे बः नमः पृष्ठे भः न
मः उदरे यः नमः हृदये रः नमः दक्षांसे लः ककुदि वः न
मः वामांसे शः नमः हृदादिदक्षबाहौ षः नमः हृदादिवा
मबाहौ सः नमः हृदादिदक्षपादे हः नमः हृदादिवामपा
दे ळः नमः हृदादिजठरे क्षः नमः हृदादिवदने इति स्थि
तिन्यासः अथ स्थितिमातृकामाह अस्य श्रीस्थितिमातृ
कान्यासस्य प्रजापति ऋषिः गायत्री छंदः विश्वपालिनीमा
तृका देवता हलो बीजानि स्वराः शक्तयः इष्टार्थे विनियोगः
१ पूर्वोक्तषडंगन्यासान् कृत्वा ध्यानमाह उपविष्टांबचर्मां
के ध्यायेद्देवीमनन्यधीः मृगबालं परं विद्यामक्षसूत्रं दधत्करैः
मालाविद्यालमहस्तांबहन्ध्येयः शिवो गिरम् मृगविद्ये
वामयोः वराक्षसूत्रे दक्षयोः देव्या मालाविद्ये दक्षवामयोः
ॐ नमः दक्षिणगुल्फादिक्रमेण पूर्वोक्तस्थाने स्थितिन्यासः
प्रयोगे ॐ नमः दक्षिणगुल्फे ढं नमः दक्षपादांगुलिमू
ले णं नमः दक्षपादांगुल्यग्रे एवं वामपादे तं नमः ॥

मं.मं.

१२

12

7.9

वामपादमूले· थंनमः वामजानुनि· दंः नमः वामगुल्
फे धंः नमः वामपादांगुलिमूले· नंः नमः वामपादांगुल्यग्रे
पंः नमः दक्षपार्श्वे। फंः नमः वामपार्श्वे· बंः पृष्ठे भंः नाभौ मंः
उदरे यंः हृदये रंः दक्षांसे लंः ककुदि वंः वामांसे शंः हृदा
दि दक्षबाहौ षंः हृदादिवामबाहौ संः हृदादि दक्षपादे हंः
हृदादि वामपादे लंः हृदादिजठरे क्षंः हृदादिवदने अंः
नमः ललाटे आंः मुखवृत्ते इं दक्षनेत्रे ईं वामनेत्रे उं· दक्ष
श्रोत्रे ऊं· वामश्रोत्रे ऋंः दक्षनासापुटे ॠंः वामनासा
पुटे लृंः दक्षगण्डे। लॄंः वामगंडे· एंः ऊर्ध्वोष्ठे ऐंः अधरोष्ठे
ओंः ऊर्ध्वदंतपंक्तौ औंः अधोदंतपंक्तौ अंः मूर्ध्नि अः नमो
वक्त्रे। कंः दक्षबाहुमूले खंः दक्षकूर्परे गंः दक्षमणिबंधे घंः
दक्षांगुलिमूले ङंः दक्षांगुल्यग्रेः एवंवामहस्ते चवर्गन्यासे
त् चंः वामबाहुमूले छंः वामकूर्परेः जंः वाममणिबंधे।
झंः वामांगुलिमूले ञंः वामांगुल्यग्रे टंः नमः दक्षपादमू·

लेठः दक्षजान्वन्ति इति स्थितिन्यासे तथा एवं ध्यात्वा उपका
रयान्वर्णान्तं गेषु विन्यसेत् गुल्फादिजानुपर्यन्तं स्थितिन्यासे

ह्रौं ह्रौं रत्नी येव वर्गाख्य वर्गशक्तीश्च तत्पर्थको आपिनी
पालिनी चापि पाविनी क्लेदिनी पुनः ८७ धारिणी
मालिनी पश्चाद्धंसिनी शंखिनी तथा वर्गशक्त
यः प्रोक्ताः पंचमे तत्त्वमातरः ८८ षष्ठे शक्रादयो
देवाः सप्तमे वज्रपूर्वकाः इत्थं संपूज्य देवेशं न्य
सेद्वर्णान्निजांगके ८९ ललाटे मुखवृत्ते नेत्रश्र
वोनासागण्डयोः ओष्ठयोर्दन्तपंक्त्योश्च मूर्द्धि
वक्त्रे न्यसेत्स्वरान् ९० बाह्वोः संधिषु साग्रेषु कचव
र्गौ न्यसेत्सुधीः टतवर्गौ पदोस्तद्वत्पार्श्वयोः पृष्ठ
देशतः ९१ नाभौ कुक्षौ पवर्गं च हृद्दंसककुदंस
तः त्वगस्रमादि च तद्वर्णान् प्राणिदृक्कं ततो न्यसे
त् ९२ हृदादिकरयोर्न्यस्य जठरे वदने तथा सृष्टि
न्यासं विधायैवं स्थितिन्यासं समाचरेत् ९३ ऋ
षिमुक्तं दक्षपूर्वोक्तं देवता विश्वपालिनी उपविष्टां
वचभांके ध्यायेद्देवीमनन्यधीः ९४ स्रग्वाले
वरं विद्यामक्षसूत्रं दधत्करैः मालाविद्यालसद्ध
स्तां वहन्त्येयः शिवो गिरम् ९५ एवं ध्यात्वा उका
रयान्तवर्णान्तं गेषु विन्यसेत् गुल्फादिजानुपा
र्यन्तं स्थितिन्यासो यमीरितः ९६

संहारमातृकान्यासमाह अस्यश्रीसंहारमातृकान्यासस्य ब्रह्मा
ऋषिर्गायत्रीछंदः शत्रुसंहारिणीशारदादेवताः अन्यत्पूर्ववत्।
ध्यानमाह अक्षस्रक्टंकसारंगविद्याहस्तां त्रिलोचनां॰ चंद्रमौ
लिं कुचानम्रां रक्ताजस्थां गिरं भजे॰ अक्षेति स्रगविद्ये वामयोः
र्णांत्ताद्यानां तान् विलोमतः क्षकारादि अकारान्तानि तिवद
नस्थानमारभ्य विलोमक्रमेण संहारन्यासोयं॰ प्रयोगस्तु
ह्रं नम॰ इत्यादि वदने॰ लं इत्याधुरे॰ हं इत्यादि वामपादे
सं॰ वामबाहौ॰ शं दक्षबाहौ वं वामांसे॰ लं ककुदि॰ रं दक्षांसे॰ यं
हृदये॰ मं उदरे॰ भं नाभौ॰ वं वामांसे॰ लं ककुदि॰ रं दक्षांसे॰ यं ह
दये॰ मं उदरे॰ भं नाभौ॰ चं पृष्ठे फं वामपार्श्वे॰ पं दक्षपार्श्वे॰ नं वाम॰
न्यासे संहारसंज्ञे तु ऋषिश्छंदश्च पूर्ववत् संहारिणी सप
र्णानां शारदा देवता स्मृता ५७ अक्षस्रक्टंकसारंग
विद्याहस्तां त्रिलोचनां चंद्रमौलिं कुचानम्रां रक्ताव
स्थां गिरं भजे ५८ ध्यात्वैवं विन्यसेद्वर्णान् क्षाद्यानांत
न् विलोमतः सृष्टिन्यासेतु सर्गांताः सर्गविंदुंतिकाः।
स्थितौ ५९॥
पादांगुल्यग्रे॰ धं वामपादांगुलिमूले दं वामगुल्फे॰ थं वामजानुनि॰
तं वामपादमूले॰ णं दक्षपादांगुल्यग्रे॰ ढं दक्षपादांगुलिमूले॰ डं
दक्षगुल्फे॰ ठं दक्षजानुनि॰ टं दक्षपादमूले॰ ञं वामहस्तांगुल्य
ग्रे॰ झं वामपादहस्तांगुलिमूले जं वाममणिबंधे॰ छं वामकूर्परे॰
चं वामबाहुमूले॰ ङं दक्षांगुल्यग्रे॰ घं दक्षांगुलिमूले गं दक्षमणि
बंधे खं दक्षकूर्परे॰ कं दक्षबाहुमूले॰ अः मुखे॰ अं शिरसि॰ औं अ
धरदंतपंक्तौ ओं ऊर्ध्वदंतपंक्तौ॰ ऐं अधरोष्ठे॰ एं ऊर्ध्वोष्ठे॰ ॡं वाम
गंडे ऌं वामनासापुटे॰ ॠं दक्षनासापुटे॰ ऋं वामकर्णे॰ ऊं दक्षकर्णे॰
ईं वामनेत्रे॰ ईं दक्षनेत्रे॰ आं भ्रूमध्ये॰ अं नमो ललाटे इति संहारमा
तृकाः नमस्ताश्च नमः वाता रमेषु टा॰ उं॰ अं उं॰ इतिश्चादि ६०॥

स्यष्टिन्यासं स्थितिन्यासं ततः कुर्यात्प्रयत्नतः भारतीमेवमारा
ध्य भजेदिष्टान्मनून्सुधीरिति अथ पुरश्चरणमाह आदौ देवव
शीकर्तुं पुरश्चरणमाचरेत्· तीर्थादौ निर्जने स्थाने भूमिग्रहण
पूर्वकं दाक्षारण्ये· पश्चिमद्वारगे लिंगे पूर्वमूर्त्ते शिवालये· ना
रायणालये वापि पर्वताग्रेऽथवा शुचिः आचार्यसंततितो वा।
विजपेत्संख्याचतुष्टयं दशांशो होमयेद्विद्वान् राजभाराज्य

विंदतां संस्तौ चैषा पूर्ववन्नांगपूजने न्यस्यास्सर्व
त्र नत्यंतावर्णवाता रसंपुटाः १ सृष्टिन्यासं स्थिति।
न्यासं ततः कुर्यात्प्रयत्नतः अन्येतु मातृकान्यासाः
कथ्याः पूजानंतरं गके १ मंत्रस्नानादिविषयो गद्या
त्तत्रैव तेमया। भारतीमेवमाराध्य भजेदिष्टान्म।
नून्सुधी २ विल्वःशिवो गणेशोऽर्को दुर्गाः पंचैव देव
ताः आराध्याः सिद्धिकामेन तत्तत्मंत्रैर्यथोदितं २
आदौ देववशीकर्तुं पुरश्चरणमाचरेत् तीर्थादौ नि
र्जने स्थाने भूमिग्रहणपूर्वकं ४ नवधा तां धरां कृ
त्वा पूर्वादिषु समालिखेत् कोष्ठेषु स्वरवर्गाश्चला
तौ मध्ये तत्स्वरान् ५॥

लोलिंनैरिति· मंत्रराशीत्· पर्वताग्रे नदातीरे विल्वमूले ज
लाशये गोष्ठे देवालये पुण्यस्थाने तुलसीवने पुण्यक्षेत्रे
गुरोः पार्श्वे चित्तैकाग्र्यस्थले पि वा पुरश्चरणकृन्मंत्री सिद्ध्यतेव
न संशयः इति दीपस्थानमाह नवधे· अपस्थानभूमिं नवधा
कृत्वा पूर्वादिकोष्ठेषु कचटतपयशावर्गान् लक्षाश्च अष्टसु वि
लिख्य मध्यकोष्ठमपि तथा विधाय· तत्र पूर्वादिषु स्वरद्वंद्वं
त्रेतामादि वर्णो यत्र कोष्ठे तदेव दीपस्थानं सिद्धिदम् ५॥

७.१

मंम·
५

14

नद	क४			
	म२	आ२	इ२	व४
श२	ओ२		उ२	ट४
	ए२	लृ२	ऋ२	
प२		प४		न४

आगमे सुखस्थो लभते सिद्धिं क
रस्थः स्वल्पजीवित उदासीनः कु
क्षिसंस्थः यादस्यो दुःखमाप्नुयात्
पुच्छः पीड्यते मंत्री बंधनोच्चाटना
दिभिः कूर्मचक्रमिदं प्रोक्तं मंत्राणां
सिद्धिसाधकमिति श्रीदेवीयाम
ले कुरुक्षेत्रे प्रयोगे च गंगासागमे
गमे महाकाले च काश्यां च दीपस्थापनं चिंतयेदिति रुद्रयामले·
त्रिपुरारहस्ये जीवहीनो यथा देही सर्वकर्मसु न क्षमः पुरश्चरण

हेत्वनामादिमो वर्णो यत्र कोष्ठं भवेत्ततः उपविश्य जपं
कुर्यान्मान्यस्मिन् दुःखदेश्य ले ८ आमध्याह्नं जपं कु·
र्यादुपांशुं वाथ मानसं हविष्यं निशि भुंजीत त्रिस्ना
यी भंगवर्जितः ७॥ऽऽ

दीनोहि न मंत्रः फलदायकः पुरणंतरेकस्याजिते ज्ञानसि।
द्धिर्मीन आर्याच्च धर्मणिश्चेतवस्त्रेयश्चो हृद्धि सर्वार्थी चित्रकं
वले· आसनस्पोजयेत सम्यक् मंत्रार्थगतमानसः उदङ्मु
खः प्राङ्मुखो वाप्येमादिकं चरेदिति· पुरश्चरणधर्मानाहृ।
आमध्याह्नमिति उपांशु शनैर्वर्णोच्चारणं· मानसं मनसैव त्रिः
स्नापी त्रिषवणस्नानशीलः ८ अन्यैः संभाषणमन्यभाषा·अ
त्यजानोदृष्टात्स्पर्शनं तत्त्यजेत् ७॥ऽऽ

शिवगीतायाम् विल्ववृक्षंसमाश्रित्ययोमंत्रान्विविधान्जपेत्·
एकेनदिवसेनैवतत्पुरश्चरणंभवेत्· यस्तुविल्ववनेनित्यंकु
टीकृत्वाजपेन्नरः सर्वमंत्राःप्रसिद्ध्यंतिजपमात्रेणकेवलं पर्वता
ग्रेनदीतीरेविल्वमूलेशिवालये अग्निहोत्रेकेशवस्यसंनिधौ
तुजपेत्तुयः नैवास्यविघ्नंकुर्वंतिदानवायक्षराक्षसाः तंनस्पृ
शंतिपापानिशिवसायुज्यमृच्छति ब्राह्मंमुहूर्तमारभ्यआम
ध्याह्नंजपेन्मनुं अतऊर्ध्वंकृतेजापेविनाशोभवतिध्रुवं तत्र
पुरश्चरणनाममंत्रफलसिद्ध्यर्थंमयोद्यान्तेनपूर्वमेवनम् अथ

अथनालस्यंनिष्ठीवक्रोधपादप्रसारणम् अन्यभा
षांऽत्यजेद्धेचजपकालेमनेत्सुधीः ८ स्त्रीशूद्र
भाषणंनिद्रांताम्बूलंशयनंदिवा प्रतिग्रहंतस्यगी
तेकौटिल्यंवर्जयेत्सदा ९ भूशय्याब्रह्मचर्यंच
त्रिकालंदेवतार्चनं नैमित्तिकार्चनंदेवस्तुतिंवि
श्वासमाश्रयेत १० प्रत्यहंप्रत्यहंतावन्नैवन्यूना
धिकंक्वचित् एवंजपंसमाप्यांतेदशांशंहोममाच
रेत् ११ ॥

प्रयोगः शुभदिनेभूमेःपरिग्रहंकृत्वा पुरश्चरणात्प्राक्तृ
तीयदिवसेक्षौरादिकंविधायएकभक्तंकुर्यात् ततःपर
दिनेस्नानादिकंविधायशुद्धःसन् अश्वत्थोदुम्बरप्लक्षाणाम
न्यतमस्यवितस्तिमात्रान्दशकीलकान् अस्त्रायफडितिमं
त्रेणाष्टोत्तरशताभिमंत्रितान्वेदिकायां ॐ येचात्रविघ्नकर्ता
रोदिविभुव्यंतरिक्षगाः विघ्नभूताश्चयेचान्येममसंत्रस्यसि
द्धिः मयैतत्कीलितंक्षेत्रंपरित्यज्यविदूरतः ॥

अपसर्वन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे इत्यनेन दशदिक्षु ति
ल्वन्यतेषु ओं नमः सुदर्शनाय अस्त्राय फट् इति मंत्रेणास्त्रं
संपूज्य पूर्वादिक्रमेण इंद्रादिलोकपालान् ओं भूर्भुवः स्व
इंद्रलोकपाल इहागच्छेत्याद्यावाह्य पंचोपचारैः पूजयेत्।
ततो मध्यस्थाने क्षेत्रपालं वास्तोष्पतिं च संपूज्य सर्वविघ्नवि
नाशनार्थं गणपतिं प्रपूजयेत् यथा अद्येत्यादि अमुकगोत्रः

ततः कल्पोदितकुण्डे स्थंडिले वा दीर्घते प्राणाया
मषडंगं च कृत्वा मूलेन मंत्रवित् ५ कुण्डे वा स्थंडि
ले कुर्यात् संस्काराणां चतुष्टयं मूलेनेक्षणमस्त्रे
णप्रोक्षणं ताडनं कुशैः ५ वर्मणाभ्युक्षितां सिच्य
लिखेद्यंत्रं तदनेनैव वह्निकोणषडस्राष्टदलभूमंदि
रादिकम् ५ मध्ये तारपुटां मायां लिखित्वा पी
ठमर्चयेत् मंडूकाद्यपरतत्वांतं पीठशक्तीर्जया
दिकाः ५ वामीश्रीवामीश्वर्योगपीठात्मनेन
मः मायादिकः पीठमंत्रस्तयोस्तेनासनं दिशेत् ।१६

अमुकदेवशर्मा सत्कर्तव्यामुकमंत्रपुरश्चरणकर्मणि विघ्नवि
नाशनार्थं गणेशपूजनमहं करिष्ये इति संकल्प्य वेदीमध्ये पंचोप
चारैः संपूज्य ततः अद्यामुकगोत्रः श्री अमुकदेवशर्माज्ञाताज्ञा
तजनितपापक्षयकाम अघोरं सहस्रं सावित्रीजपमहं क
रिष्ये ततः उपवासं हविष्यं वा कुर्यात् ततः परदिने उषसि
स्नानादिकं विधाय ॥

यस्वस्तिवाचनपूर्वकंसंकल्पंकुर्यात् ॐ·अद्येत्यादिअमुकमंत्र
सिद्धिप्रतिबंधकाशेषदुरितक्षयपूर्वकतन्मंत्रसिद्धिकामोऽस्या
मुपावत्कालेनपुरश्चरणंसेत्स्यतितावत्कालममुकगोत्रस्ये
यत्संख्यातद्दशांशहोमतद्दशांशतर्पणतद्दशांशाभिषेकत।
द्दशांशब्राह्मणभोजनरूपपुरश्चरणमहंकरिष्येइतिसंकल्प
तथाचत्रैलोक्यमोहनतंत्रेशुभेमुहूर्तेनक्षत्रेशुद्धेकालेयतव्रत :
गुरोराज्ञांसमासाद्यततःकर्मसमारभेत्· पुण्यक्षेत्रादिकंगत्वा
कुर्याद्भूमिपरिग्रहं· तथा· स्वमुकमंत्रस्यपुरश्चरणसिद्धये·।

यजेत्तौनारायणाभ्यांगंधाद्यैरुपचारकैः ल
क्ष्मीनारायणौत्वर्च्यौवैल्लवेहोमकर्मणि ८॥

ममेयंरक्षतेभूमिर्मंत्रोमेसिद्ध्यतामितिनावद्यसंख्यापूर्तौ
निर्जैर्द्वैर्जपसंख्यादशांशतः यथोक्तकुण्डेजुहुयाद्यथा
विधिसमाहितः अथवाप्रत्यहंजप्त्वाजुहुयात्तद्दशांशतः शा
रदातिलकेनित्यंनैमित्तिकंहोमंस्थण्डिलेवासमाचरेत् ह
स्तमात्रेणतत्कुर्याद्वालुकाभिःसुशोभितंअंगुलोत्सेधसं।
युक्तंचतुरस्रंसमंततः अथहोमविधिमाह प्राणायामेति।
आचम्यप्राणानायम्यगुर्वादीन्नत्वाआसनस्थापनादिमू।
लमंत्रन्यासांतंकृत्वा ॐ·अद्येत्यादिदेशकालौसंकीर्त्यअमु
कगोत्रनामकोऽहममुककामस्त्वमुकदेवताप्रीतये ॥१॥

मंम. १९ 16

अमुकमंत्रदशांशं अमुकद्रव्येणहोममहं करिष्ये इ
ति संकल्प्य. कुण्डस्थण्डिलं वा मूलेन वीक्ष्य १ फट् कुशै
श्चतुर्दिक्षु प्रोक्ष्य २ तैरेव कुशैः संताड्य ३ मुष्टिबंधेन जले
नक्षुभितामिसिंचयेत् ४ एवं चतुःसंस्कारैः संकुर्यात् ततो
मध्ये त्रिकोणषट्कोणाष्टदलचतुरस्रं यंत्रं विलिख्य त
न्मध्ये ॐ ह्रां ॐ विलिख्य तोरणाभ्युक्षयंक्षकादि परत्वान्न दे
वताः संपूज्य पूर्वादिदिक्षु मध्ये ॐ जं जयायै ॐ अजि
तायै ॐ अं अपराजितायै ॐ नित्यायै ॐ विविलासिन्यैः
ॐ दों दोग्ध्र्यै ॐ अं अघोरायै ॐ मंमंगलायै. इति पीठशक्तीः सं

सूर्यकांतां दरणितः श्रोत्रियागारतो पिवा यात्रे
णपिहिते पात्रे वह्निमानाययत्नतः १८ ॥

पूज्य ह्रीं वागीशी वागीश्वरयोर्योगपीठात्मने नमः इति पीठ
मंत्रेण आसनं दत्वा. ॐ ह्रीं वागीश्वर वागीश्वराभ्यां नमः आवा
हनं. गंधादि पंचोपचारैः अभ्यर्च्य. वैल्ववेत्तु वागीश्वरयो
स्थाने लक्ष्मीनारायणौ पूज्यौ तत्र पीठशक्तीः विमलायै उ
त्कर्षिण्यै ज्ञानायै. क्रियायै योगायै. पद्मायै. सत्यायै. ईशाना
यै. अनुग्रहायै. इति पीठशक्तीः संपूज्य ॐ श्री लक्ष्मीनाराय
णयोर्योगपीठात्मने नम इति वैल्वपीठमंत्रः ॐ ह्रीं लक्ष्मी
नारायणाभ्यां नम इति मंत्रेण गंधादिभिरभ्यर्च्य. सूर्यकांताद
रणितः श्रोत्रिभागारतो पिवाः पात्रेण पिहितं पात्रे वह्निमानी
ययत्नतः १८ ॥

श्रोत्रियागारादग्निमानीयास्त्रेणादायतत्पात्रंक्रुमितिवर्मणा
उद्घाटयायफडित्यस्त्रेणैनैऋत्येक्रव्यादांशंपकमंगारंपरित्यज्य।
मूलेनस्वपुरतोधृत्वा·वीक्षणंमूलमंत्रेणप्रोक्षणंमतम्·तेनैव।
ताडनंदर्भैर्वर्मणाऽभ्युक्षणंमतं·वीक्षणंताडनंअभ्युक्षणंइतिव
न्हेःसंस्कारात्पूर्ववत्कृत्वापरमात्मनाजाठराग्निनाचैक्यंस
रस्मरेत्मितिस्वचैतन्यंतत्रसंयोज्यतारेणाभिमंत्र्यवमितियेनतु

अस्त्रेणादायतत्पात्रंवर्मणोद्घाटयेत्ततम् अस्त्रमंत्रे।
णैनैऋत्येक्रव्यादांशंततस्त्यजेत् १९ मूलेनपुरतो।
धृत्वासंस्कारांश्चतुरश्चरेत् वीक्षणाद्यान्पुराप्रोक्ता
नस्त्रप्रोक्षणमाचरेत् २० परमात्मानलेनाथजाठ
रेणापिवह्निना स्मरेदैक्यंवह्निवीजाच्चैतन्यंयोजये
त्ततः २१ तारेणचाभिमंत्र्याग्निंहृदयायेतिमुद्रया।
अमृतीकृत्यसंरक्षेदस्त्रमंत्रेणमंत्रवित् २२ मुद्रया
त्ववगुंठिंहस्याकवचेनावगुंठयेत् कुण्डस्योप।
रितोवह्निंभ्रामयेत्त्रिर्ध्रुवंपठन् २३ ॥

ऊंप्रदर्श्यअस्त्रेणसंरक्ष्यकवचेनावकुण्ठ्यकुण्डोपरितारे।
णत्रिःपरिभ्राम्यशय्यागतानामृतुस्नातांनीलेन्दीवरधारिणीं दे
वेनसंजप्यमानांतांस्मृत्यातद्योनिमण्डलेमूलंहूंवह्निचैतन्याय।
नमइतिमंत्रंपठन्जातस्यपश्चमहीतलंइधारेतोध्येयैवात्मसं।

ग.२

मं.म. ९ 17 सुखंवह्निंस्थापयेदिति॰नवार्णमनुरुच्यते। रेफोरेफः अर्घीश
तुकारःगगनंहकारःविंदुरनुस्वारः शेषंस्वरूपंहृदयांतोन
मोन्तस्तेन॰हूंवह्निचेतन्याय नमइति नवार्णोमंत्रः ततस्त्वया
ग चमनंदत्वा २६ चतुर्विंशतिवर्णमनुरुच्यते चिदिति चिं।
त्पिंगल॰ हन २ दह २ पच २ सर्वज्ञाज्ञापय स्वाहा वे
दभुजाक्षरः चतुर्विंशतिवर्णाः इतिमंत्रेणवसुनामा।

शय्यागतास्वरुद्धां तां नीलेंदीवरधारिणीम् देवेन
भुज्यमानां तां स्मृत्वा तद्योनिमण्डले २४ ईशरेतो
धियावह्निंस्थापयेदात्मसंस्थं एवम् मूलं नवार्णं च
पठन् जानुस्पृष्टधरातलः २५ रेफार्घीशेंदुसंयु।
क्तं गगनं वह्निचेतनः नमायहृदयांतोयं नवार्णो
ऽतिविधापनं २६ विप्राणपाचमनं देवी देवयोर्ज्व
लयेदमुं चतुर्विंशतिवर्णेन मंत्रेणाप्रपणादिभिः
चिंत्पिंगलहनहनदहदहपचपचद्वयं सर्वज्ञाज्ञाप
यस्वाहा मंत्रो वेदभुजाक्षरः २८॥

ग्निं ज्वालयेत् ज्वालिनीमुद्रां प्रदर्श्य ज्वालिनीमुद्रालक्षण
म्: मणिबन्ध युतौ कृत्वा॰प्रसृतांजलिकौ करौ कनिष्ठांगुष्ठ
युगले मिलित्वान्ये प्रसारिते ज्वालिनीनाममुद्रेयं वैश्वानर
प्रियंकरीति ततउत्थायांजलिं बध्वा ॐ अग्निं प्रज्वलितं वं
दे जातवेदं हुताशनम् सुवर्णवर्णममलं समिद्धं विश्वतो
मुखमिति मंत्रेणोपस्थाय न्यासं कुर्यात् २८॥

अग्निमंत्रमाह वैश्वानरजातवेदइहावह लोहिताक्षसर्वक।
र्माणिसाधयस्वाहेति अस्याग्निमंत्रस्यभृगुऋषिः गायत्रीछंदः
अग्निर्देवता रंबीजं स्वाहाशक्तिः हवनेविनियोगः ॐहृदयंस्वाहा
डें॰ताश्चतस्रोंगुल्यः २२ जिह्वाबीजानुच्चरति॰दीपिकाऊकारः।

प्रदर्श्यज्वालिनीमुद्रामुत्थायविहितांजलिः
श्लोकरूपेणमंत्रेणोपतिष्ठेत्तहुताशनम् २९ अ।
ग्निंप्रज्वलितंवंदेजातवेदंहुताशनं सुवर्णवर्णम
मलंसमिद्धंविश्वतोमुखम् १॰ अथाग्निमंत्रवित्य
स्यनिह्नधानमुदीर्यते वैश्वानरांतेजातेतिवेदांते
स्यादिहावह ११ लोहिताक्षपदात्सर्वकर्माणिपने
चसाधयः वह्निप्रियांतोमंत्रोयंषड्विंशत्यक्षरान्वित : १२
ऋषिश्छंदोदेवताश्चभृगुगायत्रपावकाः रंबीजंवह्नि
र्यशक्तिर्हवनेविनियोजनं ११ लिंगेपायौमूर्ध्निव
क्त्रेनासिनेत्रेविलागके वह्नेर्जिह्वास्वबीजाढ्यान्य
सेद्दुःतानमोन्विता १४॥

अनलोरकारः वायुर्यकारः एतेषुस्थिताः सकाराद्याः विलोमव
र्णाः सषशवलरयेति॰ सेंदवोनुस्वाराद्याः इमेसप्तहिरण्यादिस।
प्तजिह्वानांबीजानीत्यर्थः ततश्चसंहिरण्यायैनमो लिंगेषुंग।
गनायैनमः पायौ गुदेश्रृंरक्तायैनमो मूर्ध्नि श्रृंकृष्णायैनमो।

मं.म. मुखे लृं सुप्रसंनायै नमो नासिकयोः ॡं अतिरक्तायै न
१८ मो नेत्रयोः ॠं बहुरूपायै नमः सर्वांगे एष्वेवस्थानेषु· ॐ देवे
18 भ्यो नमो लिंगे· ॐ पिं पिंगलेभ्यो नमः पायौ गं गंधर्वेभ्यो
मूर्ध्नि· यं यक्षेभ्यो मुखे· नं नागेभ्यो नासिकयोः पिं पिशा
चेभ्यो नेत्रयोः रं राक्षसेभ्यो नमः सर्वांगे षडंगमाह· ॐ सह

हिरण्यागगनारक्ता कृष्णा सुप्रभया न्विता बहुरू
पातिरक्तेति जिह्वा दग्धनसो मताः ३६ दीपिका
तलवायुस्याः साध्यावर्णा विलोमतः सैं देवाः सप्त
जिह्वानां सप्तानां वीजतां गताः ३७ गीर्वाणपितृ
गंधर्वयक्षनागपिशाचकाः राक्षसाश्चेति जिह्वा
नां देवतास्तत्स्थले न्यसेत् ३८ सहस्रार्चिषे हृद
याय स्वस्तिपूर्णाय मस्तकं उत्तिष्ठपुरुषायेति शिखां म
त्रोय मीरितः ३९ धूमव्यापिने वर्म सप्तजिह्वाय
नेत्रकं अस्त्रं धनुर्द्धरायेति षडंगानि समाचरेत् ४०
मूर्ध्नि वामे सके पार्श्वे कटौ लिंगे कटौ पुनः दक्षपा
र्श्वे सके न्यसेन्मूर्ती रष्टौ विभावसोः ४१ ॥

स्राचिर्षे हृदं· स्वस्तिपूर्णाय शिरः उत्तिष्ठपुरुषाय शिखा· धूम
व्यापिने कवचं· सप्तजिह्वाय नेत्रत्रयाय धनुर्द्धरायास्त्रम् मूर्ति
न्यासमाह तारायेति प्रणवाग्नये पदमूर्वायाड़े· नमोन्ताः ॐ
अग्नये जातवेदसे नमो मूर्ध्नि· ॐ अः सप्तजिह्वाय वामांसे अ· ह
व्यवाहनाय वामपार्श्वे ·अ· अश्वोदराय वामकटौ· अ ॥

वैश्वानराय लिंगोग्रः कौमारतेजसे दक्षकटौ ग्रः विश्वमुखायाद
क्षपार्श्वे · ग्र · देवमुखाय · दक्षांसे · ततः स्वदेहे हाटकरेतसो वह्निम
ण्डूकादिवह्निमण्डलपर्य्यन्ताः पीठदेवताः पूज्याः ततः पीताद्याः पी
ठशक्तयः ॐ पीं पीतायै नमः श्वें श्वेताय · अं अ · रुणाय · कृं कृष्णायै ·
धूं धूम्रायै · तीं तीव्रायै · स्फुं स्फुलिंगिन्यै · रुं रुचिरायै · ज्वां ज्वालि
न्यै नमः । इति पीठशक्तीः पीठमंत्रमाह · वीजमिति रं वह्न्यासना

तारगतये पदात्मास्त्वाग्रतः धीनमसान्विता ज्ञा।
नवेदाः सप्तजिह्वो हव्यवाहनश्चापि ४२ अश्वोद
रजसंज्ञोन्यस्तथा वैश्वानराह्वयः कौमारतेजाः।
स्याद्विश्वमुखो देवमुखस्तथा ४३ ततोन्यसेन्निजे दे
हे पीठं हाटकरेतसः वह्निमण्डलपर्य्यन्तमण्डूका।
दियथोदितम् ४४ पीता श्वेता रुणा कृष्णा धूम्रा ती।
व्रा स्फुलिंगिनी रुचिरा ज्वालिनी चेति कृशानोः पीठ
शक्तयः ४५ वीजं च वह्न्यासनायेति प्रदंतः पीठमंत्रकः
एवं विन्यस्य पीठांतं पावकं चिंतयेत्ततो ४६ त्रिनेत्र।
मारक्ततनुं स्वशुक्लवस्त्रं स्वर्णस्रजमग्निमीडे वराभ
यस्वस्तिकशक्तिहस्तं पद्मास्यमाकल्पसमूहयुक्तं ४७

सनायनम इति पीठमंत्रेण पीठन्यासः ४८ ध्यानमाह त्रिनेत्रमा
रक्ततनुं स्वशुक्लवस्त्रं स्वर्णस्रजमग्निमीडे वराभयस्वस्तिक।
शक्तिहस्तं पद्मस्थमाकल्पसमूहयुक्तं त्रिनेत्रमिति वरस्वस्ति।
कौ दक्षयोः अभीतिशक्ती वामयोः आकल्पः आभरणानि तत्संय
युतं ४७॥

मं.म. १९ 19

इतिध्यात्वामानसोपचारैःसंपूज्यमध्यमेखलायांजलेनप
रिषिंच्यप्रागग्रोदगग्रैर्दर्भैःपरिस्तीर्यप्रत्यग्दक्षिणसौम्यासु
त्रीन्परिधीन्विन्यस्यतेषुब्रह्मविष्णुरुद्रानभ्यर्च्यईशानादिषुषट्
सुकोणेषुमध्येचपूर्ववत्हिरण्याद्याःसप्तजिह्वाःसंपूज्यतेष्वे
वस्थानेषुदेवादयोपिपूज्याःततःपूर्ववत्केसरेषुषडंगानिद
लमूलेषुअग्नयेजातवेदसेनमइत्यष्टमूर्त्तिभिःदलमध्ये

एवंध्यात्वार्चनंकुर्यात्मानसंविधिवद्बुधः परि
षिंचेत्ततस्तोयैःकुंडंस्थण्डिलमेववा ४८ दर्भैःप
रिस्तरेदग्निंप्रागग्रैरुदगग्रकैः प्रत्यग्दक्षिणसौम्या
सुन्यसेत्त्रीन्परिधानक्रमात् ४९ पालाशान्वि
ल्वजांस्तेषुब्रह्मविष्णुशिवान्यजेत् ५० वह्नेस्ततः
पीठमभ्यर्च्यावाहयन्स्वहृदोनलं गंधादिभिःसम
भ्यर्च्यपूजयेत्सावकाकृतिः षट्सुकोणेषुमध्येच
जिह्वास्तद्देवतायजेत् ईशानादिषुवाह्यंतकोणेषु
षट्स्वर्चयेत् हिरण्याद्यतिरक्तांतामध्येतुबहुरू
पिणी ५१ केसरेषडंगपूजास्याद्दलेष्वष्टमूर्तयः
मातरोष्टौदलांतेषुभैरवाःस्युस्तदग्रतः ५२ ॥

ब्राह्म्यादिमातरः दलाग्रेभैरवाः ॐअंअसितांगभैरवायनमः
रुंरुरुभैःचंचण्डभैःक्रंक्रोधभैःलंउन्मत्तभैःकंकपालीभैःभीं
भीषणभैःसंसंहारभैःचतस्रेपूर्वादिषुइंद्रादीन्·वहिर्व
ज्रादीन्·पूजयेदित्यावरणपूजाःततःस्ववामभागेप्रागग्रकुशेषु·

होमपात्राण्यासादयेत्· प्रणीताप्रोक्षणीआज्यस्थालीस्रुक्स्रु।
वौ यत्नात्तथोत्तरेवामेहोमद्रव्यंहुतेकुशान्तसमिधपंचपा।
लाशीश्चत्वडुपयोगियत्तएवमासाद्यपवित्रेकृत्वामूलेनता
भ्यांप्रोक्षितानिपात्राणिउत्तानानिकृत्वाप्रणीतापात्रंजलेना
पूर्य्य· तत्रविधिनातीर्थान्यावाह्यपवित्रेआच्छाद्यतत्रति।
क्षिप्योत्पूयउत्तरतः संस्थाप्यतज्जलंकिंचित्प्रोक्षणीया।

यत्पूर्वेत्तुयत्नाद्यावत्साद्याउपसंयुताः एवमा।
वर्णैर्युक्तंसप्तभिःपावकंयजेत् ५३ असितांगो
रुरुश्चंडः क्रोधउन्मत्तसंज्ञकः कपालीभीषण
श्चापिसंहारश्चाष्टभैरवाः ५४ वामेकुशानथा।
स्तीर्य्यतत्रवस्तूनितिःक्षिपेत् प्रणीताप्रोक्षणी।
पात्रेआज्यस्थालीस्रुचंस्रुवम् ५५ अथोत्तरवाति
चेतानिहोमद्रव्यंहुतेकुशान् समिधःपंचपाला
शीरप्यदृष्टुपयोगियत् ५६ कृत्वापवित्रेमूलेन
प्रोक्षयेत्तानिशुभांभसा उत्तानानिविधायाथप्र।
णीतांपूरयेज्जलैः ५७ तीर्थमंत्रेणतीर्थानिष्टएणा
तत्राह्वयेत्सुधीः पवित्रेआच्छाद्यतांस्तत्रतिःक्षिप्ये
त्पवतंचरेत् ५८॥

त्रेनिधायतज्जलेनपवित्राभ्यांमूलेनसर्वयज्ञसाधनसंभा
रान्प्रोक्ष्य: दक्षिणेपीठमासाद्यतत्रब्रह्माणमाह्वयेत् अणि
माद्याःसिद्धयोष्टौब्रह्मणःपीठदेवताइति· मंमंडूकादिपरत
त्वांतदेवताभ्योनमःअष्टदलकेसरेषु ॐ· अंअणिमासिद्धैन·

मः ॐ प्रां प्राकाम्यसिद्ध्यैः मं महिमासिद्ध्यै· गं गरिमा· लं लघि
मा· ईं ईशित्व· वं वशित्व· प्रां प्राकाम्य· ईं इच्छासिद्ध्यै नमः इति
पीठशक्तीः संपूज्य· अत्र कर्मणि कृताकृतावेक्षकेत्वं ब्रह्मा
भव इत्यावाह्य दक्षिणे पीठे उपवेश्य ॐ ब्रह्मणे नम इति गंधा·।
दिभिरभ्यर्च्य ब्रह्ममंत्रमुद्धरति तारेति ॐ नमो ब्रह्मणे इति ९१
हस्ताभ्यां अधोमुखौ स्रुकस्रुवौ धृत्वा त्रिः संताप्य संमार्जनं।

अथोदीच्यां निधायैतान्प्रोक्षणीं तज्जले क्षिपेत्
हवनीयं द्रव्यजातमुक्षेत्तोयैः पवित्रकैः ८९ मू-
लेन मूलगायत्र्या यद्वा हृदयमंत्रतः दक्षिणे पी-
ठमासाद्य तत्र ब्राह्मणमाह्वयेत् ९० अणिमाद्याः
सिद्धयोऽष्टौ ब्रह्मणः पीठदेवताः तारस्तत्पूर्वकोऽन्ते·
तो ब्रह्ममंत्रोऽस्य पूजने ९१ हस्ताभ्यां स्रुकस्रुवौ
धृत्वा तापयेत्त्रिरधोमुखौ वामहस्तेन तौ धृत्वा द-
र्भैर्दक्षेण मार्जयेत् ९२ संप्रोक्ष्य प्रक्षणीतोयैः
प्रताप्य पूर्ववत्ततः स्रुवस्याग्रे मार्जनान्दर्भान्न्यस्तयो
शक्तित्रयं न्यसेत् ९३ इच्छाज्ञानक्रियासंज्ञं चतुर्थी
नमसान्वितं दीर्घत्रययुक्शम्भोमपूर्वकं स्थाना-
कत्रये ९४ ॥

दर्भान्प्रोक्तस्थाने क्षिपेत्· तयोर्मूलमध्याग्रेषु ह्रां इच्छायै नमः
ह्रीं ज्ञानायै· ह्रूं क्रियायै नम इति विन्यस्य· ॐ स्रुचि शक्त्यै नमः ॐ स्रु
वे शंभवे नमः। इति विन्यस्य सूत्रत्रयेण संवेष्ट्य पुष्पादिभिरभ्यर्च्य
कुशास्तीर्णेग्नेर्दक्षिणभागे संस्थापयेदिति ॥

स्त्रुक्स्त्रुवोसंस्कारः शक्तित्रयमाह इच्छेति· दीर्घत्रयं आ ई ऊ यो
सहकारस्तत्पूर्वकं ह्रां इच्छाशक्त्यै नमः मूले ह्रीं ज्ञानशक्त्यै नमो म
ध्ये· ह्रूं क्रियाशक्त्यै नमो मध्य· ह्रूं क्रियाशक्त्यै नम इति मंत्रेण इति नोक्ता
यां अथाज्यस्थालीमादाय अस्त्राभिमंत्रितेन प्रोक्षणीजलेना।
भ्युक्ष्य वीक्षणादिचतुःसंस्कारसंस्कृतं गव्यमाज्यं तस्यां निक्षिप्य।

स्रुग्दारुकं चित्यमेख्यां किंस्त्रुवेशं भजनतस्ततो सूत्रत्रयेण
संवेष्ट्य संपूज्य कुसुमादिभिः ९५ कुशेन परित्यसे
द्द्वेतयोः संस्कार ईरितः अस्त्रोक्षितायामाज्यस्य
स्थाल्यामाज्यं विनिःक्षिपेत ९६ वीक्षणादिक
संस्कारसंस्कृतं मूलमंत्रितम् गोमद्रयामस्ती।
कृत्य षट् संस्कारांस्तत्र आचरेत ९७ कुण्डोहृते वा।
युकोण स्थिते गारे विनिक्षिपेत हृदेति तापनमथो
क्तं दर्भयुग्मं प्रदीपितम् ९८ आज्ये क्षिप्त्वा हृदावं
ह्रौ पवित्रीकरणं क्षिपेत आज्यं ताराजये दीप्तदर्भ
युग्मेतवर्मणा ९९ अभिद्योतनमुक्तं तदीप्तं दर्भ
त्रयं हुते दर्शयेत्सेणोद्योतो गृहीत्वा हुतपात्रिको

७०

मूलमंत्रेणाभिमंत्र्य येत्मुद्रां प्रदर्शयेद्वायुकोणाग्गारात्· पृथक्।
कृत्य तेषु हृत् मंत्रेणाज्यस्थालीं निवेशयेत्· अथ तापनसंस्का
रः १ दर्भयुगलं संदीप्य· हृन्मंत्रेणाज्ये क्षिप्त्वा अग्नौ क्षिपेत् इति
पवित्रीकरणसंस्कारः २ पुनरन्यं दर्भगलं प्रदीप्य तेनाज्यं हृ।
मिति कवच मंत्रेण निराज्याग्नौ क्षिपेत ॥

संस· प्रथमभिद्योतनसंस्कारः ३ दीप्तं दर्भत्रयं फडित्युक्ते प्रदर्श्य
२१ वह्नौ क्षिपेत्· इदमुद्योतनसंस्कारः ४ आज्यस्थालीस्थता
21 र्थस्य ततः दर्भौ निधायाग्रनाग्रलायः स्पृष्ट्वाङ्गुष्ठानामि
काभ्यां उदग्रगाभ्यां पवित्राभ्यामाज्यं फट् त्रिरुत्पूय दर्भौ व।

संयोज्याग्नौ तद्गावान्नसलिलं संस्पर्शोत्क्र
धीः अङ्गुष्ठानामिकाभ्यां तद्दर्भौ वाद्दाय तिः
क्षिपेत् ११ त्रिरग्निसंमुखे त्वाज्यमह्नेणोत्प
वनं त्रिदं इदात्मसंमुखे तहदाज्यह्लेयस्तसं
स्रवः १२ नीराजनादिसंस्कारेष्वग्नौ दर्भान्त्व।
विति क्षिपेत् दर्भद्वयं ग्रन्थिकृतं घृतमध्ये विनि
क्षिपेत् १३ वामदक्षिणयोः पक्षौ स्पृष्ट्वा नाडीत्र
यं स्मरेत् दक्षिणाद्वामतो मध्याद्धृतादाय घृतं मु
खे: १४ अग्नये त्रिप्रियासोमायस्वाहेत्यग्नि।
नेत्रयोः जुहुयादग्निषोमाभ्यां स्वाहेत्यक्षिणा।
स्तृतीयके १५ पातयेदाहुतेः शेषमाहुतिग्रह
णस्थले भूयोऽप्यदादन्नभागादादायाज्यं मु।
खे यजेत् १६॥

ह्नौ क्षिपेत् इत्युत्पवनसंस्कारः ५ तद्वत्पुनर्दर्भद्वयेनात्मसंमु
खे नमः मिताज्यानि क्षिपेत् इति प्लवनसंस्कारः ६ दर्भक्षेपोऽग्नौ
इति षट्संस्कारान् कृत्वा ततः प्रादेशमात्रं कुशाद्वयं ॥

पवित्रेकृत्वा मध्यग्रेषितं हृदयमेकीकृत्य प्रागग्रेहृतमूध्ये।
निधायद्वौभागौकृत्वा तत्र भागद्वये· दक्षोशुक्लपक्षवामेकृ
ष्णपक्षं दक्षेपिंगला· वामेइडां मध्येसुषुम्णांचध्यात्वाज्यकु
यात् पश्चाद्दक्षिणभागात् स्रुवेणकृत्स्नंमंत्रेणाज्यमादाय अ।
ग्नेर्दक्षिणलोचने· ॐअग्नयेस्वाहाहुतशेषमाज्यदक्षिण
भागेपातयेत् एवंवामभागात्स्रुवेणकृत्स्नंमंत्रेणाजमादाय

अग्नयेस्विष्टकृतेतंतेनास्योद्घाततनेमतं नरसिंहं
विनाविल्वमंत्रेनेत्रहृदयंयजेत् ७७ नरसिंहात्मदेवो।
ऽवह्नेर्नेत्रत्रयंस्मृतम् महाव्याहृतिभिर्व्यस्तसम
स्ताभिस्त्रुटय ७८ आहुतीनांत्रयंवह्निमंत्रेणे।
वतत्स्मरेत् हुत्वाहुतिभिरष्टाभिरेकैकांसंस्कृ।
तिंचरेत् ७९ श्रोमस्याग्नेरसंस्कारंकरोम्यति
वचभा इत्यंमन्तंजपन्गर्भाधानंप्रसवंततः ८०
सीमंतोन्नयनंजातकर्मकृत्वाततस्मरेत् वह्नेपं।
चसमिद्धोमांतालापनयनेवसोः ८१ कुर्याद्देवा
भिधानेनपूर्ववन्नामसूक्ष्मणः नामांतंतरेमनसापि
नैरौयोजयेद्धृदि ८२॥

अग्नेर्वामलोचने: ॐसोमायस्वाहेति· एवंकृत्स्नमंत्रेण· मध्यादा
दायमध्यलोचने· ॐअग्नीषोमाभ्यांस्वाहाहुतशेषंदक्षिण
भागेसंपातयेत्· इत्यग्नेर्नेत्रोद्घाटनसंस्कार: नौकायांतदाहु
तिचतुष्टये· नाग्नेर्नेत्रप्रकाशोभवतीत्यर्थ: ॥:

सं·म·
२२
22

तत्रत्वसिंहात्पविलमंत्रेभुतेत्रहयंअत्यत्रत्रयमेव।ततोभूः
स्वाहा भुवःस्वाहा स्वःस्वाहा भूर्भुवःस्वाहा इतिहुत्वासं
पातःपात्रांतरे इतिपरमगुरवः ॐवैश्वानरजातवेदइहावह
लोहिताक्षसर्वकर्माणिसाधयस्वाहाअग्नये इदंनममेति
त्रिवारंहुत्वा· ततःसंस्काराः ॐअस्याग्नेर्गर्भाधानसंस्कारं
करोमिस्वाहा अग्नयेइदंनममइतिसर्वत्रसंस्कारेभ्यस्त्यागःए
वमष्टौस्रुवेणहुत्वाहुतयः १ अस्याग्नेःपुंसवनंस्वाहा २
अस्यसीमंतोन्नयनसं·हा·३·अस्यजातकर्मसं·हा ४ मूला

अन्नप्राशनंतथाचौलोपनयोदारयोजनं संस्का
राःस्युर्विवाहांतामस्त्यंताःक्रूरकर्मणि ८३ एकै
कामाहुतिंकुर्याद्धुहेजिह्वांगमूर्तिभिः इंद्रा
दिभिश्चवज्राद्यैर्हिंवातेनेर्जुहुयात्ततः ८४ स्रु
वेणाज्यंचतन्वीरंनिधायस्रुचिताम्रधीः अपि
धायस्रुवेणैनोरक्षीघात्करणमतः ८५ ॥

एकूतसंस्कृतपंचसमिद्धोमलक्षणं नालापनयनंकृत्वास्रुत
कंविशोध्य ॐअस्याग्नेर्नालापनयनसंस्कारंकरोमिस्वाहा ५·
ॐअस्यनामकरणसंस्कारंकरोमिस्वाहा इतिहुत्वानामद
द्यात्· शिवाग्निःकामेश्वराग्निः वागीश्वराग्निः त्वसिंहाग्निःए
माग्निःहृल्लाग्निःदुर्गाग्निरित्यादि· ६· अग्नेपितरोसंपूज्यप
दिविसर्जयेत् अस्यान्नप्राशनं ७· ॥

अस्यचौलम् अस्योपनयनम् १ अस्यविवाहसम् २ शु
भेकार्येविवाहांता: संस्कारा: अस्तुमेस्वंता: प्रति संस्कारम।
ष्टौ अष्टावाज्याहुतय: तत: ओंसंहिरण्यायै स्वाहा ष्ठंग।
गनायै अंसुरक्तायै बृंबहुरूपायै लंसुप्रभायै सृंअतिर
क्तायै: पृंवहुरूपायैदेवेभ्य: स्वाहा पिंपितृभ्य: स्वाहा गंध
र्वेभ्योस्वाहा यंयक्षेभ्य नं नागेभ्य: रां राक्षसेभ्य: पिंपिशा।
चेभ्य: ओंसहस्रार्चिषेहृदयायनम: स्वस्तिपूर्णायशिरसेस्वा
हा उत्तिष्ठपुरुषाय शिखायैवषट् स्वाहा भूमव्यापिनेकवचा
यहूंस्वाहा सप्तजिह्वायनेत्रत्रयायवौषट्स्वाहा धनुर्धराया
स्त्रायफट्स्वाहा अग्नयेजातवेदसेस्वाहा ओंअं सप्तजिह्वा।
यस्वाहा अहव्यवाहनाय अ अश्वोदराय अवैश्वानराय
अ कौमारतेजसे अविश्वमुखाय: ग्रंथांतरे आंब्राह्मीस्वा
हा ईमाहेश्वर्यै ऊकामायै: ऋंवैष्णव्यै लंवाराह्यै ऐंइन्द्रा।
ण्यै औंचामुण्डायै: अ: महालक्ष्म्यै स्वाहा अंअसितांगभै।
रवायस्वाहा इंरुरुभै उंचण्डभै ऋंक्रोधभै लंउन्मत्तभै
एंकपालभै ओंभीषणभै अंसंहारभै: लंइन्द्रायस्वाहा रं।
अग्नये मंय माय षंनैऋतये वंवरुणाय यंवायवे संसो।
माय हंईशानायस्वाहा ह्रीं अनंताय आंब्रह्मणे वंवज्राय
शंशक्तये दंदंडाय खंखड्गाय पंपाशाय अंअंकुशाय।
गंगदायै त्रिंत्रिशूलाय चंचक्राय कंकमलायस्वाहा इमे
वंवह्नेर्जिह्वागाहत्रिवर्णदेवानामेकेकामाज्याहुतिंहुत्वाश्र
वेणचतुर्वारंस्त्रुचिहुतमापूर्णपुष्पंफलंनत्रनिधायायाऽधो।

ग.१

मं.म. स्रुवस्रुवेणाज्याधोत्थायकराभ्यांतयोर्मूलेंतामौनिधायवा
२१ मस्तनांततन्मूलमातीय· ॐ वैश्वानरजातवेद इहावहलो
